140
24 (B)

अथ

बोधायनसोमप्रयोगः।

रुद्रदत्तप्रणीतः।

१४०
२४ (B)

Bodhayan Som Prayogaha:

सूतकअदेह

श्रीरस्तु। अनंतदेवकृत बोधायन

सोमप्रयोगः समाप्तः ॥ ६ ॥

षड्विंशासदिकाष्टस्थासोस्याद्भयपादिकः ॥ एकपंचत्रयोहस्थासदक्षतारिसंचरः ॥ श्री
मिमसहविधनिर्दयमधमुमचरः ॥ अशवुत्तरबंदिस्थाद्धर्धस्पातदे भवेत् ॥ २ ॥

॥ बौधायनसोम प्रयोग आरभ्यते ॥
अनंतदेवसुतरुद्रदनकृतः ॥ श्री

प

श्रीगणेशायनमः ॥ यस्यज्ञानमनंतंदानं यस्यदानंतं ॥ भक्तिर्थेरयानंतंतमनंतं
गुरुंनौमि ॥ १ ॥ आश्वलायनशाखिनोयजमानस्यबोधायनसोमप्रयोगः ॥ तत्रा
धानपूर्वकेसोमेनर्तुनक्षत्रादिनियमः ॥ अन्यत्रसोमेवसंतेपौर्णमास्याममावास्या
यांवायजनीयेवासुत्यातदनुसारेणदीक्षादिकल्पनं ॥ देवनक्षत्रेदीक्षापौर्ण
मास्यांसुत्येतिवा ॥ कृत्तिकाप्रथमंविशाखोत्तमंतानिदेवनक्षत्राणितत्रैव
दीक्षासुत्यायदामावास्यायांयजनीयेवासुत्यातदाद्वादशदीक्षाः ॥ अमा
वास्यायांयजनीयेवादीक्षा [illegible] तदादर्श्योस्यनिपातेनदोषोनेतिकेचित् ५ श्री
उदगयनेपूर्वपक्षेवातदाप्रतिपदिदीक्षापंचम्यांसुत्याद्वितीयायांदीक्षा
षष्ठ्यांसुत्याएवमापूर्वपक्षसमाप्तिः ॥ एवमेषामन्यतमःकालोवधार्यः ॥ १

पक्षात्तुनसोमस्यैंद्राग्नः पु…नरु स्सृष्टः पशुः ॥ पूर्वेद्युर्हनादनाजीर्णः पुनर्बलवान्पुनरु २

त्रिपुरस्सृष्टः ॥ त्रिपुरसृष्टंवेदवोद्द्विच्छेदआश्विनच्छागोधूम्रवर्णोललामः ॥ पुरस्ता
त्रि अग्निहोत्रादिपूर्ववत्पक्षेपशुद्वयंभेदेनतत्त्वांस्पमेकयोर्वा ॥ सोमाधानेअग्नीषो
मीयेणसहसवनीयेनवासहापालंभः ॥ यदासोमाधानेपिपशुद्वयंतत्रैपात्तत्वा
व सोमेनयजेततस्यांगत्वेनान्वधायकत्वादितित्वेनलाकारः ॥ विच्छिन्नसोमपीथ
स्यसोमाधानंनास्तीत्युच्यते ॥ जुष्टेदेवयजनेशालांप्राचीनवंशांदिक्ष्वंतिकाद्द
क्षिणतोवृषभश्चयसींचतुर्दिक्षुद्वारवतीं ॥ तस्यादक्षिणतोव्रतश्रपणागारंप्राग्
ग्वंशासप्रश्चिमस्यागारंपत्नीशालास्त्वेवुष्पदा ॥ उदग्द्वारमितिध्रुवः ॥ पश्चात्पत्नी
शाला ॥ अथयदिदूरतोर्धंतदात्तरपाशालांद्वाकूटपरिवारोपूर्वेयजमाना
यापरंपत्न्यैतयोःप्राचीद्वारंकुर्वंति ॥ तदुदकुंभोस्थापयतीतिशालायांद्वा
दशपदाद्वादशप्रक्रमावाविहारः ॥ पूर्वेद्युर्नांदीमुखंश्राद्धंवृद्धकंश्राद्धंतिसर

१ द्विपदस्त्रिपदोप्रक्रमः एकपदोपीत्येके पदंपंचदशांगुलंद्वादशांगुलंवादशां
गुलमपीत्येके ॥

२ बंधं च कृत्वा अपरेद्युः स्नानादिपंचकं कृत्वा अपरेद्युः स्नानादिपंचकं कृत्वा पुण्याहं वा
चयेत् ॥ अग्न्यादि विष्ण्वादयः प्रीयंतामिति विशेषः ॥ अथ गार्हपत्यस्य पश्चात् प्रागग्र
षु दर्भेषु प्राङ्मुख उत्तरतः पतिं दक्षिणतः पत्नीं चोपवेश्य प्राणानायम्य याः पु
रस्तात् दीक्षादि निर्विष्टमित्यंतेऽस्मिन् परमेश्वरप्रीत्यर्थं अविच्छिन्नसोमपीथसंधानार्थं
मे द्राह्यायणपक्षे दौर्ब्राह्मण्यपरिहारार्थं मध्येऽनेन पशुसूक्तं सोमाभिषवपशुना
समानतंत्रं कुर्वन् द्वासोत्रेण दशदशशस्त्रेण सप्रवर्ग्येण । ८ रथंतरसाम्नैक
विंशतिगुदक्षिणेन द्वादशशतगुदक्षिणेन शतगवदक्षिणेन ज्योतिष्टोमे वा
नाग्निष्टोमसंस्थेन चतुष्टोमेन स्वर्गकामः सोमेन यक्ष्ये ॥ इत्युपव्याहर
णं त्रिर्मनसा त्रिरुच्चैः ॥ तत्र कृष्णलामित्यादि ओं तथेत्संतं कुर्यात् ॥ अथ २
सोमप्रवाकं वृणीते ॥ सोमप्रवाको वदति । असौ यजमान त्वां होतारं वृणी

॥ बौधायनसोमप्रयोग आरभ्यते ॥
अनंतदेवसुत रुद्रदत्तकृतः ॥ श्री

तदादि सर्वान्त्विजो वदतीति भावः

स्नानुपवनमंगलाचमन ----
मंगलसंकल्पपुण्याहवाचनानि पंच

तद्यथाहि । तं ऋत्विजः पृच्छति । को यष्टाः क ऋत्विजः का दक्षिणा इति स प्रतिवदति । काम्या
पोयष्टो ज्योतिष्टोमोग्निष्टोमः । कण्व्याणा ऋत्विजः कर्षकापी दक्षिणेति यजमानस्ते
नाहतांस त्रयोपविश्य वृतस्नानादिवन्तुकान्त्विजो वृणीते । ब्रह्माण मेव प्रथमं
वृणीते पश्चाद्धोतारमथाध्वर्युमथोद्गातारं । तदानीन्यवरपांसचो नरा । तदा होता
रमेव प्रथमं वृणीत होतुः पादावुपसंगृह्यामुकशर्मा हे हौत्रेण त्वा गच्छा । प्रियाज
यतु माभवान्न । अग्निर्मे होता समे होता होतारं त्वामुं वृणे । इत्यत्र सर्वत्र नामा
देशः सर्वतो जपेत । महन्मे वोचो भर्गो मे वोचो भगामृवाचायशो मे वोचः स्तोमं मे
वोचः क्लृप्तिं मे वोचो भुक्तिं मे वोचस्तृप्तिं मे वोचः सर्वं मे वोचस्तन्मा वहुतन्माविश
न्तेनस्तु क्षिषीय । होता । अग्निष्टे होता स ते होता होता हं तवाहं तमानुषः । यजमा
नः ॐ तथा । पादोपसंग्रहः प्रतिवचने सर्वत्र । ततो ब्रह्माणं । इदं मामे ब्रह्मास

तन्माविश चतुर २ भुक्तिं ३

मे॰ ब्रह्मा॰

ब्रह्माणं त्वामुं वृणे॥ ब्रह्मा महन्म इत्यादि॰ प्रतिपद्य॥ चंद्रमास्ते ब्रह्मा स ते ब्रह्मा

२ ब्रह्माऽहं ते मानुषः॥ तत्रोध्वर्युं॥ आदित्यो मे ध्वर्युः स मेध्वर्युरध्वर्यु त्वामुं वृणे॥

२ अध्वर्युर्महन्म इत्यादि॰ पद्य॥ आदित्यस्ते ध्वर्युः स तेध्वर्युरध्वर्युरहं ते मानुषः॥ त

तउद्गातारं। पर्जन्यो मउद्गाता स मउद्गाता उद्गातारं त्वामुं वृणे॥ उद्गाता महन्म इ

त्यादि॰ पद्य। पर्जन्यस्तउद्गाता स तउद्गाता उद्गाताऽहं ते मानुषः॥ ततो होत्रकान्प

आपो मे होत्राशंसिन्यस्ता मे होत्राशंसिन्यो होत्राशंसिनीर्वो मुं वृणे॥ अमु

कामुकशर्मणा इति सर्वेषां नामान्यतिदिशेत्॥ होत्रकाः प्रत्येकं महन्म इत्यादि॰ ३

पद्य। आपस्ते होत्राशंसिन्यस्तास्ते होत्राशंसिन्यो होत्राशंसिन्यो वयं ते मानुषाः॥

ततश्चमसाध्वर्यून्॥ रश्मयो मे चमसाध्वर्यवस्ते चमसाध्वर्यवश्चमसाध्वर्यू

होत्रकशब्देन मैत्रावरुणादयो द्वा
दश लक्षणया गृह्यन्ते

मे। होत्रकाणां समासेन एव वरणं॥
यथा विदुरुक्त... मानुषा इति तथा
... होत्रकाणि तिसत्यासाढः
इति रुद्रदत्तमथ पिहित

चमसाध्वर्यवस्ते ते देवयजनं ददतु अथवा देवयजनं नयाचति। ततः सर्वार्त्वि
ग्भोजनं धनेन च

वयजनं ददातु॥ होतर्देवयजनं मे देहि॥ होता॥ अग्निर्देवो दैव्यो होता स ते दे
४ वयजनं ददातु॥ उद्गातर्देवयजनं मे देहि॥ उद्गाता॥ पर्जन्यो देवो दैव्य उद्गाता स ते उ
देवयजनं ददातु॥ सदस्य देवयजनं मे देहि॥ सदस्यः॥ आकाशो देवो दैव्यः स
दस्यः स ते देवयजनं ददातु॥ होत्रका देवयजनं मे दत्त॥ होत्रकाः॥ आपो
देव्यो दैव्या होत्राशंसिन्यस्ता वो देवयजनं ददतु॥ चमसाध्वर्यवो देवयजन स्तो
वा नं मे दत्त॥ रश्मयो दैव्याः गार्हपत्यमुपविश्य यजमानः इडादधनमेव ददतु॥
विहरणापक्षेऽग्नीन्विहृत्याज्यसंस्कारादि कृत्वा स्रुवेणैवमुपसंधायाह
वनीये चतुर्गृहीतमाज्यं गृहीत्वा जुहोति। वास्तोष्पते प्रतिजानीह्यस्मान्‌॥०। ४
जुषस्व शन्नो वाधि कृधि पदं च चतुष्पदे॥ वास्तोष्पते शग्मया सं॰॥ आ

आवः क्षेम उ॰ सदा नः स्वाहा। यजमानः वास्तोष्पत इदं॥ ततो गार्हपत्य य
मजस्रान्वाहार्यपचनयोः समारोपयति॥ अयं ते योनिरृत्वियो यतो जातो अरोचथाः॥ य
जमानेनैव समारोपः कार्यः॥ ज्योतिष्टोमोक्तसमारोपाभिधानाद्येत दा
योः समारोपे वैकल्पिकयोगपद्यं॥ अजस्रपक्षे गार्हपत्यमेवाभिव
दन्ति॥ आश्वलायनो यजमानश्चैव आसीदाधानाव धियाग इति पा
ठः॥ शालामध्ये तिउदकुंभं गृहीत्वा कश्चिद्गमनात् गच्छति। तद्वु
यजमानः॥ सोमम र पत्न्याद्याय पल्न्यन्वारब्धः संभारैः सह यस्मि
न्नाहवनीयादि स्थापितो गच्छति। तदा नवे शालां परीत्य पूर्वद्वाराच्छालां
प्रविशंति॥ अध्वर्युर्गार्हपत्यायतनाद्धं वस्याथ वाह्यायजमा

नः प्रत्यवरोहेति मथितमाग्निं पत्न्यायतने ऽग्निं निधायाहवनीयमुद्धृत्य परिस्त
५ मुखपरिस्तीर्य परिषिच्य चतुर्गृहीतमाहवनीये जुहोति मनो ज्योतिर्जुष
तामाज्यं विच्छिन्नं यज्ञं समिमं दधातु । याइष्टा उषसो निम्रुचश्च ताः संदधा
मि हविषा घृतेन स्वाहा ॥ यजमानः मनसे ज्योतिष इदं ॥ अग्नय इदमि
ति कल्प ४ ॥ आज्यं पशावः पुरोडाशीया एते मे यज्ञार्था यावद्यज्ञ उप
त योक्ष्यते तावन्मे यज्ञार्थं शेषान् ब्राह्मणा भुंजीरन्नु इति निर्दिश्य इत्यकै
इ हयक्ष्य इति वदेत् ॥ यजमानाद्देवयजनमध्यवस्येति ॥ विभज्य एतद्दे ५
वप्रवर्ग्यसंभरणान्वेदं ॥ एदमगन्म देवयजनं पृथिव्या विश्वेदेवा यदजु

ष्टो मूम्बाण्णे ॥ नामा देशो त्रनजपश्च पूर्ववत् ॥ वर्यंते मानुषाः ॥ ततः सदस्यं ॥ आ
ऋोशामे सदस्याः सभे सदस्यः सदस्यं त्वा मुंट्टणे ॥ सदस्यः ॥ महन्मइत्यादि॰ षीय ।
आकाशन्तो सदस्यः सते सदस्यः सदस्यो हं ते मानुषः ॥ न वा सदस्यव न्नपां ॥
नमां समभ्भी युनक्ति यमुपेयुराके तोरपवर्गात् ॥ यजमानः स्वज्ञा खयामधु
पर्कं कुर्यात् ॥ प्राप्तानामातिथ्या दिर्स की र्ये तान्मधुपर्केण पूजयि
ष्य इति संकल्प्य ॥ प्राङ्मुखा नासने षूपवेश्य कांडानुसमयेन पदार्थानुसमय
न वा पूजां कुर्यात् ॥ ॥ अथ ऋत्विजो देवयजनं याचति । अध्वर्यो देवयजनं मे
देहि ॥ अध्वर्युः आदित्यो देवो दैवो ध्वर्युः स ते देवयजनं ददातु ॥ यजमानः ॐ
तथेति सर्वत्र ॥ ब्रह्मन्देवयजनं मे देहि । ब्रह्मा चंद्रमा देवो दैवो ब्रह्मा स ते दे

षंतपूर्वेक्कसामाभ्यांयजुषासंतरंतौरायस्पोषेणसमिषामदेमपत्नीवा॥
हतःपश्चाद्दिवउत्तरतःप्रजःपुरस्ताद्दिवोदक्षिणातइति।एवमरान्मस्यस्याप्रवमि
तःपश्चाद्दिवाद्दिवमिवहतः॥अथप्रवर्ग्येसंभारःपां॥उत्तरेपक्षेविहृत्यप्रशमय
जमानाध्वर्युप्रतिप्रस्थातारोअग्नीध्रःयज्ञायतनमुपविश्यशांतिजपं॥ ॥नमो
वाचेयाचोदितायाचानुदितातस्यैवाचेनमोनमोवाचेनमोवाचस्पतयेनम
ऋषिभ्योमंत्रकृद्भ्योमंत्रपतिभ्योमामामृषयोमंत्रकृतोमंत्रपतयःपरादुर्मा
हमृषीन्मंत्रकृतोमंत्रपतीन्परादांवैश्वदेवींवाचमुद्यासंशिवामदस्तांजु
ष्टांदेवेभ्यःशर्ममेद्यौःशर्मपृथिवीशर्मविश्वमिदंजगत्॥शर्मचंद्रश्चसूर्यश्च
शर्मब्रह्मप्रजापती॥भूतंवदिष्येभुवनंवदिष्येतेजोवदिष्येयशोवदिष्येतपो
वदिष्येब्रह्मवदिष्येसत्यंवदिष्येतस्माअहमिदमुपस्तरणमुपस्तृणेउप

स्तरंपांमेप्रजायैपशूनांभूयासंदुपस्तरंपापमहंप्रजायैपशूनांभूयासंप्र
णापानौमृत्योर्मापातंप्राणापानौमामाहासिष्टंमधुमानिष्यमधुरानिष्य
५व मधुहूय।।भिमधुवर्दिष्याभिमधुमतीदेवेभ्योवाचमुद्यासंशुश्रूषेण्यांमनु
ष्येभ्यस्तंमादेवाअवंतुशोभायैपितरोनुमदंतु।।ॐशांतिःशांतिःशांतिः।।
अध्वर्युरग्नेपाशेणालोपरुमात्रेगर्तेखात्वातत्रसंस्रुतांमदंबिलेनसंप्र
प्रक्षिप्योत्तरतस्तृपापुउदकंसंस्छानिवराहविहतंवल्मीकवपांशुष्कां
दूर्वांकसेछागापयश्चसादयति।।तदुत्तरतःप्रागग्रेषुदर्भेषुसंस्छाद्रि
नंप्राचीनग्रीवंकृष्णाजिनंलोमोपस्तृणाति।।उत्तरस्यपत्रालखंडस्यायस्फ्य
तोघस्यावोक्ष्यसिकताभिर्मृदापरिमंडलंखरंकृत्वातत्रसिकतान्युप्यकु ५
शाद्दूर्वाभिश्चप्रछाद्यपरिश्रित्वाप्राचीद्वारेकृत्वातत्रैवोपसादयति।।४५

तामभिमंत्रयते ॥ अंगिरासि नांगिरस्य ध्वरद्वद्देवेभ्यः ॥ उत्तिष्ठति ॥ उ
७ त्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वेमहे ॥ उप प्र यंतु मरुतः सुदानव इंद्र प्राशूर्भ
वा सचा ॥ तीर्थेन गत्वा स्रुक्कारं प्रैति ॥ प्रैतु ब्रह्मणस्पतिः प्र देव्येतु
सूनृता ॥ अच्छा वीरं नर्यं पंक्तिराधसं देवा यज्ञं नयंतु नः ॥ ब्रह्मयज
मानावपि तीर्थेन गत्वा गतस्याग्रेण परीत्य दक्षिणत उपविशतः ॥
अध्वर्युर्मृदमुपतिष्ठते ॥ देवी द्यावापृथिवी अनु मे मंसाथां ॥ अ
भ्रिमाहरति ॥ ऋध्यासमद्य मखस्य शिरः ॥ उपउपस्पृश्य हर
ति ॥ मखाय त्वा ॥ उत्तरतः कृष्णाजिने निवपति ॥ मखस्य त्वा शी ७
र्ष्णे ॥ एवं द्वितीयमेवं तृतीयं ॥ ऋध्यासमित्यादि ॥ तूष्णीं चतुर्थं

मृदं परिश्रिताध्ववराहविहतामुपतिष्ठते ॥ इयत्यग्र आसीः ॥ प्रहरणा
दि निरसि पर्णांतं पूर्ववत् ॥ वल्मीकवपामुपतिष्ठते ॥ देवीर्वम्रीरस्य
भूतस्य प्रथमजा ऋतावरीः ॥ प्रहरणादि परिश्रिपर्णांतं पूर्ववत् ॥
दूर्वामुपतिष्ठते ॥ इंद्रस्यौजोसि ॥ प्रहरणादि पूर्ववत् ॥ छागाप
यउपतिष्ठते ॥ अग्निजा असि प्रजापते रेतः ॥ पयस्याभिक्षमवदधा
ति ॥ ऋध्या॰ शिरः ॥ प्राग्वदुत्खाय मृदि प्रक्षिप्तात्र्याति ॥ मखस्य त्वा
शीर्ष्णे ॥ एवं द्वितीयमेवं तृतीयं ॥ तूष्णीं चतुर्थेन सह संवप
यः कृष्णेन मृदि परिषिंचति ॥ अत्र वैतानतिशेषात्स्थापयंति ॥
प्रायश्चित्तार्थं ॥ अध्वर्युब्रह्मयजमानाः सह कृष्णाजिनेन प्र

वल्मीकमादत्तेमुखान्यन्यतः खलाप्रवर्ग्यप्रागस्वार्जिताअपराह्णेप्रत्य
८ गस्वार्जिताः प्रवर्ग्यमानयंति ॥ देवश्रसूप्रस्पति देवेतुसद्यस्या ॥ अ
च्छावीर्यं न यूपं शिरोधन्वं दवायत्तं नयंतु नः ॥ सर्वमंत्रं ब्रूयुः स्वरसाद प्र
यंति ॥ आयुर्धेहि प्राणं धेह्यपानं धेहि व्यानं धेहि चक्षुर्धेहि श्रोत्रं धेहि मा
मनो धेहि वाचं धेह्यात्मानं धेहि प्रतिष्ठां धेहि मां धेहि मयि धेहि ॥ सर्व
मंत्रं ब्रूयुः ॥ अध्वर्युः अन्यग्रामकपालपिष्टैः शर्करापिष्टैः रजलोमैः
कृष्णाजिनलोमभिर्मृदं संसृज्य मर्दंते ॥ [illegible]ः संयौति ॥ मधुत्वामधुला करो
तु ॥ किंचिदिसारिष्ठि [illegible] दीर्घपिंडं करोति ॥ मखस्य शिरोसि ॥ अंगुष्ठा
भ्यां त्रिधाकरोति ॥ यज्ञस्य पदेस्थः ॥ एकस्य त्रीन्पिंडान्स्थाल्यां ८
मेकं कर्त्रे प्रयच्छति ॥ गायत्र्यासि ॥ कर्ता तेन महावीरस्य मूलं करोति ॥

न्यग्रामकपालपिष्टानि शर्करापिष्टानि अजलोमानि कृष्णाजिनलोमानि
फलकं वेणुशलाकां कर्तारं ब्राह्मणं ॥ गार्हपत्यसमीपं दलीरधिश्रपयाति प
अंतर्वेदि उपयमनी स्फ्यालि मात्रीस्थाली दिरीमौं दुंबरीं विपाबीवे कुंक
तीं वाग्निं प्राचीं निदधाति ॥ शालायाः द्वाराणि परिश्रयति ॥ पत्नीशालप
तीमुपवेश्य परिश्रयति ॥ अग्नीन्परिस्तीर्य दक्षिणतो ब्रह्माणं यजमा
नावुपवेश्याज्यसंस्कारादि कृत्वा यजमानेनान्वारब्धः स्रुवे चतुर्गृहीतं जु
होति ॥ युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः ॥ वि
होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ॥
यजं सवित्र इदं ॥ अध्वर्युरुपविश्य ॥ अभ्रिमादत्ते ॥ देवस्य त्वा ॰ ददे ॥

फलकोपरिहस्तेन ॥ गायत्रेणत्वा छंदसा करोमि ॥ अध्वर्युर्द्वितीयं प्रयछ
ति ॥ त्रैष्टुभमसि ॥ कृतो तेन महावीरस्य मध्यं करोति ॥ त्रैष्टुभेन त्वा छंद
सा करोमि ॥ अध्वर्युर्जागतमसि तृतीयं प्रयछति ॥ कृतो तेन महावीर
स्य बिलं करोति ॥ जागतेन त्वा छंदसा करोमि ॥ तं प्रादेशमात्रं पृ
थुमूलं मध्ये संनतं पृथुग्रीवं कृत्वा वेणुशलाकया स्याधस्तात्तृतीय
भागं वर्जयित्वा दरं करोति ॥ बिलस्याधस्तात् अंगुले चतुरंगुले वा
रास्नां परिमंडलां करोति ॥ मखस्य रास्नासि ॥ बिलं करोति ॥ अ
दितिस्ते बिलं गृह्णातु पांक्तेन छंदसा ॥ महावीरमादित्येनाभित
पति ॥ सूर्यस्य हरसा श्राय ॥ खरे निदधाति ॥ अध्वर्युस्तमभिमं

च्यवते ॥ मखोसि । एवं द्वितीयं तृतीयं ॥ त्रीन् पिंडान् करोति त्यादि मखस्यास्
स्यंत ॥ कृतीशोषितयास्मदालक्ष्मी पिन्वने रौहिणकपाले चाज्यस्थालीं च
करोति ॥ अतिशिष्टमृदास्वपि प्राति लिप्यानि वा तच्छोषयति ॥ अध्वर्यु
र्गार्हपत्याग्निमाहृत्य लौकिकं वा तुं साश्वस्य कां विंशति शकृत्पिंडानादी
प्य सुरव्यं महावीरं धूपयति ॥ वृष्णो अश्वस्य निष्पदसि वरुणस्त्वा धृत
व्रत आ धूपयतु मित्रावरुणयोर्ध्रुवेण धर्मणा ॥ अंतर्बहिश्च स्तु धूपि
तं त्वा निदधाति ॥ त्वमिति स्रो ॥ नृघ्नां पिन्वना दीनि उत्तरेण शालां
संघने गर्ते प्रांचम् उदीचो वा महावीरान्निदधाति ॥ पुरस्तात् पिन्वने प
श्चाद्रौहिणकपाले चाज्यस्थालीं च ॥ इंधनेन प्रच्छाद्य मृदवलिंपति ॥
तं चतुरंगुलिमनुदिशमादीपनाय छिद्राणि स्थापयति ॥ पुरस्ता

१० ध्रयति॥उत्तिष्ठबृहन्भवोर्ध्वस्तिष्ठध्रुवस्त्वं॥स्वस्थानेसादयति॥अपद्य
मानःपृथिव्यामाशादिशआपृण॥महावीरमीक्षते॥सूर्यस्यत्वाचक्षु
षान्वीक्षऋजवेत्वासाधवेत्वासुक्षित्यैत्वाभूत्यैत्वा॥नेमंदक्षिणंपुरीषे
पापर्यूहति॥इदमहममुमामुष्यायणंब्रह्मवर्चसेनपर्यूहामि॥अमु
मितिप्रियजमानस्यनामग्रहणाति॥अमुष्यायणमितितदपत्यंत्रं॥संदं
शेनसंतेवधायांतर्बहिश्चछागापयसासिंचति॥गायत्रेण
त्वाछंदसाघृष्णामित्रैष्टुभेनत्वाछंदसाघृष्णामिजागतेनत्वा
छंदसाघृष्णामिघृष्णापातुत्वावाक्घृष्णापातुत्वोर्क्घृष्णापातुत्वा १०

हविर्ष्मृष्छुंधिवाचंछुंधिऊर्जंछुंधिहविर्देवपुरश्चरसघ्यासं
त्वा॥गोपयसाश्रीतीकरोति॥एवंद्वितीयमेवंतृतीयंअं
गारोहपना॥दिश्रीतीकरणांतं॥तूष्णींपिन्वनेरौहिणाक
पालेचाज्यस्थालींचांगारोहपनादिश्रीतीकरणांतंप
सर्वखार्यांनिधायदक्षजिनेनप्रच्छाद्याधोत्तरदशा
लोरवंरडेत्रिक्यस्थापयति॥यथापत्नीनपेक्षय

११ ति सर्वे शांतिं जपं ति ॥ शंनो वातः पवतां मात
रिश्वा शंनस्तपतु सूर्यः ॥ अहा हानि शं
भवंतु नः शंऽरात्रिः प्रतिधीयतां ॥ शमुषा
नो व्युछतु शमा १२

दा दीपयति येनाग्निना धूपयाति तेनैव ॥ आदेविता दक्षिणतः ॥ शेषाविषे
ता पश्चाद् ज्योतिषत्ता उत्तरतः ॥ नपसेत्ता ॥ यदि प्रातस्तदा सायमुद्धा
स्यूति ॥ यदि सायं तदा प्रातः ॥ पक्षेषु नवगोपयश्चागापया धृष्टिमभ्र
ष्टपि सतसंदंशो रवारी शिक्ये न क्षा जनमिसे तत्समादाया श्येति ॥ अ
भीमं महिना दिवं मित्रो बभूव सप्रथाः ॥ उत श्रवसा पृथिवीं ॥ मित्रस्य
चर्षणी धृतः श्रवो देवस्य सानसिं ॥ द्युम्नं चित्रश्रवस्तमं ॥ धृष्टिमाद
त्ते ॥ सिध्येता ॥ तयामुख्यामकावीरा दंगारानुद्वपति ॥ देवस्त्वा सवि
तोद्वपतु सुपाणिः स्वंगुरिः सुबाहुरुत शक्त्या ॥ महावीरं संदंशो नो

तन्नोमोमहञ्आवहवातञ्आवातुभेषजंशंभूर्मयोभूर्नोहृदे।।प्रण
आयूꣳषितारिषत्।।इंद्रस्यगृहोसितंत्वाप्रपद्येसगुःसाश्वः।।स
हयन्मेअस्तितेन।।भूःप्रपद्येभुवःप्रपद्येस्वःप्रपद्येभूर्भुवःस्वःप्र
पद्येवायुंप्रपद्येनार्त्तांदेवतांप्रपद्येऽश्मानमाखणंप्रपद्येप्रजापते
र्ब्रह्मकोशंब्रह्मप्रपद्येओंप्रपद्ये।।अंतरिक्षंमउर्वंतरंबृहदग्नयःपर्व रं
तश्चययावातःस्वस्त्यास्वस्तिमांतयास्वस्त्यास्वस्तिमानसानि।।
प्राणापानौमृत्योर्मापातंप्राणापानौमामाहासिष्टंमयिमेधां
मयिप्रजांमय्यग्निस्तेजोदधातुमयिमेधांमयिप्रजांमयींद्रइंद्रि १२

यंदधातुमयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातु।।द्युभिर
क्तुभिःपरिपातमस्मानरिष्टेभिरश्विनासौभगेभिः।।तन्नोमित्रो
वरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः।।कयानश्चित्र
आभुवदूतीसदावृधःसखा।।कयाशचिष्ठयावृता।।कस्त्वास
तां त्योमदानांमꣳहिष्ठोमत्सदंधसः।।दृढाचिदारुजेवसु।।अभी
षुणःसखीनामविताजरितॄणां।।शतंभवास्यूतिभिः।।वयः
सुपर्णाउपसेदुरिंद्रंप्रियमेधाऋषयोनाधमानाः।।अपध्वां

तनूरपुहि पूर्धि च वसु सु मुमुग्ध्यस्मा न्निधेहि पक्वधानां ॥ शंनो देवीरभिष्ट
१२ य आपो भवंतु पीतये ॥ शंयोरभिस्रवंतु नः ॥ ईशाना वार्याणां क्ष
यंतीश्चर्षणीनां ॥ अपो याचामि भेषजं ॥ सुमित्रिया न आप ओ
षधयः संतु दुर्मित्रियास्तस्मै भूयासुर्योस्मान्द्वेष्टि यंच वयं द्विष्मः ॥
आपो हि ष्ठा० से ॥ यो वः शि० तस्मा ॥ तस्मा अरंग० चनः ॥ पृथिवी
शांता साग्निना शांता सा मे शांता शुचं शमयतु ॥ द्यौः शांता सा
दित्येन शांता सा मे शांता शुचं शमयतु ॥ २ ॥ अंतरिक्षं शां
तं तद्वायुना शांतं तन्मे शांतं शुचं शमयतु ॥ पृथिवी शां १३

दित्यउदरेनेनु ॥ शिवा नः शंतमा भव सुमृडीका सरस्वति मा ते व्योम संदृ
शि ॥ इडायै वास्त्वसि वास्तुमद्वास्तुमंतो भूयास्म मा वास्तोश्छित्स्मह्यवा
स्तुः स भूयाद्योस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ प्रतिष्ठासि प्रतिष्ठावंतो भू
यास्म मा प्रतिष्ठायाश्छित्स्मह्यप्रतिष्ठः स भूयाद्योस्मान्द्वेष्टि यं च व
यं द्विष्मः ॥ आ वात वाहि भेषजं वि वात वाहि यद्रपः ॥ त्वं हि विश्वभे
षजो देवानां दूत ईयसे ॥ द्वाविमौ वातौ वात आ सिंधोरा परावतः ॥
दक्षं मे अन्य आवातु परान्यो वातु यद्रपः ॥ यददो वात ते गृहेमृत
स्य निधिर्हितः ॥ ततो नो देहि जीवसे ततो नो धेहि भेषजं ॥

प्रतिष्ठा श्रद्धासत्यंधर्मश्चैता निमामाहासिषुः॥ उक्षायुषास्त्वायुषोदोषधी
१४ नाꣳरसेनोत्पर्जन्यस्यशुष्मेणोदस्थाममृताꣳ अनु॥ तच्चक्षुर्देवहितंपुर
स्ताच्छुक्रमुच्चरत्॥१ पश्येमशरदः शतंजीवेमशरदः शतंनंदामशर
दः शतंमोदामशरदः शतंभवामशरदः शतंशृणवामशरदः
शतंप्रब्रवामशरदः शतमजीतास्यामशरदः शतंज्योक्चसूर्यंदृशे॥ २
यउदगान्महतोर्णवाद्विभ्राजमानःसरिरस्यमध्यात्समोवृषभो
लोहिताक्षःसूर्योविपश्चिन्मनसापुनातु॥ ब्रह्मणश्चोतन्यसिब्र
ह्मणआणीस्थोब्रह्मणआवपनमसि धारितेयंपृथिवीब्रह्म १४

णामहीधारितमेनेनमहदंतरिक्षंदिवंदाधारपृथिवीꣳसदेवांयद
हंवेदतदहंधारयाणिमामद्वेदोधिविस्रसत्॥ मेधामनीषीमा
विशताꣳसमीचीभूतस्यभव्यस्यावरुध्यैसर्वमायुरयाणिसर्व
मायुरयाणि॥ आभिर्गीर्भिर्यदतोनऊनमाप्यायहरिवोवर्धमा
नः॥ यदास्तोतृभ्योमहिगोत्रारुजासिभूयिष्ठभाजोअधतेस्या
म॥ ब्रह्मप्रावादिष्मतन्नोमाहासीत्॥ ओं शांतिः शांतिः शांतिः॥
॥ ॥इतिप्रवर्ग्यसंस्करणं॥ ॥अध्वर्युःसशलाकानंतीर्थेनप्रपाद्याग्नी
ध्रमेयंशोबध्नाति॥ उत्तरपदेपुनरावृत्त्यपरिस्तीतूष्णींब्रह्मयजमा

१५ गावुपवेश्याज्यं संस्कारादि हुत्वास्तु विचतुर्गृहीतं गृहीत्वाहवनीये
जुहोत्यन्वारब्धे यजमाने मनसा मे त्रं जपति ॥ महाहविर्होता ॥
सत्यहविरध्वर्युः ॥ अच्युतपाजा अग्नीत् ॥ अच्युतमना उपव
क्ता ॥ अनाधृष्याश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ ॥ अयास्य उद्गाता ॥
वाचस्पते विधे नामन् ॥ विधेम ते नाम ॥ विधेस्त्वमस्माकं नाम ॥
वाचस्पतिः सोमं पातु ॥ मा दैव्यस्तंतुश्छेदि मा मनुष्यः ॥ न
मो दिवे ॥ नमः पृथिव्यै स्वाहा ॥ यं० ॥ वाचस्पतये ब्रह्मण इदं ॥ पुन
र्विहृत्य कूष्मांडाननुवाकत्रयं हुत्वोपस्थायवरदानांतं करोति ॥

मिरंतरिक्षं शांतिर्द्यौः शांतिर्दिशः शांतिरवांतरदिशाः शांति
र्वायुः शग्निः शांतिर्वायुः शांतिरादित्याः शांतिश्चंद्रमाः शांतिर्नक्ष
त्राणि शांतिराप शांतिरोषधयः शांतिर्वनस्पतयः शांतिर्गौः
शांतिरजा शांतिरश्वः शांतिः पुरुषः शांतिर्ब्रह्म शांतिर्ब्राह्मणः शां
तिः शांतिरेव शांतिः शांतिर्मे अस्तु शांतिः ॥ तयाहं शांत्या सर्वशां
त्या मह्यं द्विपदे चतुष्पदे च शांतिं करोमि शांतिर्मे अस्तु शांतिः ॥
एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैता
नि मोत्तिष्ठंतमनूत्तिष्ठंतु मा मां श्रीश्च ह्रीश्च धृति[illegible]श्च तपो मेधा

अथयूपछेदनं पुनर्विहृत्यचतुर्गृहीतंजुहोति उरुविष्णो
विक्रमस्वोरुक्षयायनःकृधि घृतंघृतयोनेपिबप्रप्रयज्ञप
तिंतिरस्वाहा विष्णवइदं० अध्वर्युरपरंचतुर्गृहीतंगृहीत्वा
यावत्याज्यस्थालींसस्रुवांबाहिहिरण्यमुदपात्रंकृयंतितक्षाप
ऽसपरशुं एहियजमानेस्फस्फापूर्वथाद्वारायूपदेशंगत्वासम
देशस्थंस्वबीजादेवोत्पन्नंबकुपपर्णंबहुशाखमशुष्काग्रंप्रत्यग्र
ग्रुपनतमुपतिष्ठते अत्यन्यानगान्नान्यानुपागामर्वाक्त्वापरै
रविदंपरोवरैस्तंत्वाजुषेवैष्णवंदेवयज्यायै तमाज्यस्थाल्याज्ये

नानक्ति देवस्त्वा सविता मध्वानक्तु। अंजनदेशोऊर्ध्वायं वर्हिरन्
क्षयति ओषधेत्रायस्वैनं बर्हिषि परशुनातिर्यंचं प्रहरति ॥
स्वधितेमैनं हिंसीः प्रथमं शाकलं प्रज्ञातं निदधाति तदेव
यूपशाकलं तमपाटयन्नीहूमिसमं छित्वाऽपउपस्पृश्य प्रागुद
ग्वापतंतमनुमंत्रयते दिवमग्रेणमालेखीरंतरिक्षं मध्येन
माहिंसीः पृथिव्या संभव आव्रश्चने हिरण्यं निधाय प
रिस्तीर्य पारिषिच्य पूर्वाहुतवत्स्रुग्गृहीतं जुहोति वनस्प
ते शतवल्शो विरोह स्वाहा यजमानः वनस्पत

१६

९७ यथेष्टिमिश्रंवाव्रतयतः॥उद्धरणेपक्षेदीक्षणीयेष्ट्यनंतरमेवाप्सुदीक्षा॥अन्य
थाप्सुदीक्षांगभूताहवनीयावेक्षणानुपपत्तेः॥अजस्रपक्षेयथासूत्रमेव॥ ॥
अथाप्सुदीक्षा॥ ॥अध्वर्युःसप्तक्षुरं क्षौमेवाससीद्वाविंशतिदर्भपिंजू
६ लानिनवनीतंउदशरावेविविचितं॥दृषत्पिष्टंचांजनंसाग्रांशरेषीकां
चादाय॥एतद्धियजमानेकृत्वायजमानप्रतिप्रस्थातृपत्नीभिःसहपू
र्वयाद्वारापनिष्क्रम्य॥तीर्थंगत्वायजमानस्यप्राङ्मुखस्यस्वस्यासीनस्य
दक्षिणंकर्णप्रदेशमद्भिरार्द्रयति॥आपउंदंतुजीवसेदीर्घायुत्वायवर्चसे॥ ९७

एकंदर्भपिंजूलंद्विधाकृत्वाएकंभागंमूर्ध्वाग्रंकर्णप्रदेशेनिदधाति॥ओ
षधेत्रायस्वैनंक्षुरंतिर्यंचंनिदधाति॥स्वधितेमैनंहिंसीः॥प्रवपति॥
देवश्रूरेतानिप्रवप॥यजमानःउप्तमभिमृशति॥स्वस्त्युत्तराण्यशीय॥
अध्वर्युरुत्तरेकर्णप्रदेशेअपरंभागंनिदधाति॥ओषधेत्रायस्वैनं॥अ
भिमर्श॥नांतंपूर्ववत्॥अध्वर्युर्नापितायक्षुरंप्रयच्छन्नाह॥नापितोस्यके
शश्मश्रुंमेनिकृंतनखंप्रकृंतात्॥प्रतिप्रस्थाताअध्वर्युणायजमानोद
नादिक्रियमाणेपत्न्यादक्षिणमुपपक्षमद्भिरित्यादितूष्णींसर्वंकृत्वा॥

१८
नापितात्क्षुरं प्रयच्छन्नाह ॥ नापितेमोपपक्षांमेनिकृन्तखापश्मश्रूयान ॥
नापितस्तथेत्युक्त्वोभयोस्तथा करोति नखनिकृंतनं सव्यस्यायेकनि
ष्ठिकात् ॥ अध्वर्युर्यजमानमभिषिंचति ॥ आपोअस्मान्मातरः शुंध
यंतु घृतेन नो घृतप्वः पुनंतु ॥ संप्रधाव्य रजः प्रप्लावयति ॥ विश्वमस्म
स्प्रवहंतु रिप्रं ॥ ऽ यजमानः स्नात्वातीरमेति ॥ उदाभ्यः शुचिरापूत एमि ॥
वसनस्यांतेनात्मानं यथासंभवं प्रतिच्छाद्य मध्ये तिरः पवित्रमपि आ
चामति ॥ पयस्वतीरि० सं० सृज ॥ पुनः स्मार्तवदाचम्य प्रदक्षिणम १८

यइदं । अध्वर्युरात्मानं प्रत्यभिमृशति ॥ सहस्रवल्शा विवयं रुहेम ॥ ऽ अपउपस्पृ
श्यान्वग्रं शाखाः छिनत्ति ॥ यं त्वायं स्वधिति स्तेतिजानः प्रणिनाय महते सौभगा
य ॥ सकृन्मंत्रः ॥ एकहस्तपरमं प्रादेशावमं स्थूलं त्र्यरत्निं पंचारत्निं वा दीर्घं चतु
रश्रिमष्टाश्रिं वा कृत्वा चतुरंगुलं चषालाय प्रच्छेदयति ॥ अच्छिन्नो रायः सुवीरः ॥ च
तुरश्रिमष्टाश्रिं वा चषालं ॥ अपउपस्पृश्याधिमंथनशकलं त्रयस्वरुशकलं
यूपशकलैः सह यूपमाहरति ॥ आहारयति वा ॥ शकलानि प्रज्ञातानि निदधा श्री
ति ॥ व्रतश्रपणागारे क्षारादिहितं पाचयति ॥ यद्यजमानः पत्नी च सर्पिर्मिश्रं

हतंक्षौमंवासः परिधत्ते ॥ सोमस्यतनूरसितनुवंमेपाहि ॥ तूष्णीमनुलोमेनवना
नेयाणिस्त्यांमदित्वासुरवंप्रथममभ्यंके आङ्गिरः ॥ महीनांपयोसिवर्चोधाअसिव
र्चोमयिधेहि ॥ तूष्णीमनुलोममंगानि ॥ एवमध्वर्युः ॥ प्रतिप्रस्थातासर्वं तूष्णीं
पत्न्याःरजः प्रज्ञा ॥ वनंस्वयमितिभवः ॥ पत्नीचसर्वंतूष्णींकरोति ॥ अध्वर्युः प्रत्य
ङ्मुखउपविश्यसव्येनपाणिना इरषीकयांजनेनयजमानस्यपंचकृत्वदक्षिण
मक्ष्यनक्ति ॥ पंचकृत्वः सव्यंपुनःपुनरादाय ॥ वृत्रस्यकनीनिकासिचक्षुष्पा अ
सिचक्षुर्मेपाहि ॥ प्रत्यंजनंमंत्रावृत्तिः ॥ पत्नीतूष्णीमेवमेवानक्ति ॥ अध्वर्युःसप्त

भिर्दर्भपिंजूलैर्मुखं पवयति ॥ चित्पतिस्त्वा पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य
१९ स्य रश्मिभिः ॥ सप्तभिर्नाभिः ॥ वाक्पतिस्त्वा पु० श्मिभिः ॥ सप्तभिर्गुल्फौ ॥ दे
वस्त्वा सविता पुना० श्मिभिः ॥ तानि प्रोक्ष्योदङ्ङ्गिरेस्यत् ॥ अप उपस्पृश्या
ध्वर्युर्यजमानं वाचयति ॥ तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयं ॥
एवं प्रतिप्रस्थाता पत्नीमपरिमितैर्दर्भपिंजूलैः स्पृष्ट्वा ॥ अध्वर्युरात्मनः स
व्यं पाणिं यजमानेन ग्राहयित्वा शालामानयति ॥ आ वो देवास ईमहे सत्य
धर्माणो अध्वरे ॥ यद्वो देवास आगुरे यज्ञियासो हवामहे ॥ पूर्वया द्वारा शा
लां प्रवेशयति ॥ इंद्राग्नी द्यावापृथिवी आप ओषधीः ॥ तीर्थेन प्रवेश्याग्रेण ॥ १९

३

पुरस्तादित्यादिपूर्वकत्वाभिधानात्॥ यादृत्याद्यायुरग्निक्रियादृतिकल्पसारा
च्चाग्न्यस्तेविधिपञ्चछुयाः पुरस्तादित्यादिभवति॥ यजमानः याः पुरस्तादि
त्यादिनिविष्टमित्यंते ज्योतिष्टोमार्थेन दीक्षणीयेष्ट्या यक्ष्ये॥ इति त्रिरुपांशु
त्रिरुच्चैर्वदेत्॥ तन्मऋध्यतामित्यादि ओंतयेत्यंतो॥ दीक्षणीयासंबंधिहविः॥
व्रीहिमयः पुरोडाशः॥ पंचप्रयाजाः॥ अग्नीषोमावाज्यभागौ॥ अग्नाविष्णुप्र
धानदेवता॥ देवा आज्यपा इत्यादि सद्योयक्ष्ये॥ इतःप्रभृतीनृत्विग्वरणंपत्नी
यजमानयोः व्रतंपयस्वतीरित्यादिव्रतानांव्रतपतयइत्यंतं पत्नीसंनहनंआ २०

शासानाइत्यादिउभेतिरिक्तमित्यंतं॥ यजमानभागंब्रह्मभागं चतुर्धाकरण
मन्वाहार्यफलीकरणहोमंसमिष्टयजुः प्रणीताचावनं विष्णुक्रमादिइतिप
रुपुनकुर्यात्॥ अध्वर्युर्देवागातुविद इति जपित्वापिहृत्यान्वाधानादिबर्हिर्ल
वनांतंकरोति॥ इध्मसंनहने॥ ततस्त्वांत्रयोविंशतिधेति॥ पाणीसंमो
र्जनादि॥ आग्नावैष्णवमेकादशकपालंनिर्वपतितत्रोलूखलेमुसले
इतिकृत्वा उपांशुप्रधानं॥ अग्नाविष्णुभ्यांमिदं॥ अग्नाविष्णूएहंदेवयज्यया
वृत्रहास्यासं॥ आज्यडांतंकृत्वा उलूखलेमुसलेइतिकृत्वे ध्मप्रव्रश्चनान्यष्टा

द्धानि ॥ फलीकरणान्युत्करे निवपति ॥ अह्नादीक्षणीयादि अवञ्जे
२१ त्रावरुण्यामिक्षयायाप्रायश्चित्तसंस्थाजपेमार्जनंचनकुर्यात् ॥ प्राङ्मुख्या
ध्वर्युरेवमंत्रेण स्रुवामाप्याय्याज्यं स्रुच्चाल्यांप्रत्यवनीययजमानेनान्वारब्धः
स्रुवेणजुहोति ॥ आकूत्यैप्रयुजेऽग्नयेस्वाहा ॥ मेधायैमनसेग्नये ॥ दीक्षायैम
तपसेग्नये ॥ सरस्वत्यैपूष्णेग्नये ॥ यथालिंगंत्यागः ॥ स्रुचिचतुर्गृहीतंजुहो
ति ॥ आपोदेवीर्बृहतीर्विश्वशंभुवोद्यावापृथिवीउर्वंतरिक्षंबृहस्पतिर्नोहवि
षावृधातुस्वाहा ॥ य॰ अद्भ्योद्यावापृथिवीमंतरिक्षायबृहस्पतयइदं ॥ अध्व २१

हवनीयंनीत्वादक्षिणतउदगग्रमुपवेशयति ॥ यजमानः निरसनंकृत्वोपविशति ॥
अध्वर्युराहवनीयमीक्षयति ॥ त्वंदीक्षाणामधिपतिरसि ॥ उभयोर्मंत्रः ॥ आत्मान
मुभौईक्षेते ॥ इहमासंतंपाहि ॥ प्रतिप्रस्थातापत्नीमपरयाद्वाराप्रवेश्योत्तरे
णगार्हपत्यंप्राचीमुदान्यन्वाचयति ॥ प्रैतुब्रह्मणस्पत्नीवेदिंवर्णेनसीदतु ॥
अथाहमनुकामिनीस्वेलोकेविशाइह ॥ उत्तरेणोत्करंपरीत्यअंतरेणवेद्युत्क
रौप्रत्नीचोगमयित्वाजघनेनगार्हपत्यमुपवेशयति ॥ पत्नीआसनात्तृणंनि
रस्योपविशति ॥ सुप्रजसस्त्वा॰ दीभ्यं ॥ इत्यग्रदीक्षा ॥ ॥ अथदीक्षणीया ॥
अथोपव्याहरणं विज्ञायतइति सूत्रे क्रतुसंकल्पस्ययज्ञांगसंकल्पस्यनयाः

ताम्रार्चीः।अथदीक्षा।अध्वर्युस्त्रेणाहवनीयंपर्याहृत्ययजमानायप्रयच्छतिवद्: कृ ५

युरपरंचतुर्गृहीतंगृहीत्वास्रुचंपूरयित्वाजुहोति।।विश्वोदेवस्यनेतु
र्मर्तोवृणीतसख्यं।विश्वेरायइषुध्यतिद्युम्नंवृणीतपुष्यसेस्वाहा।।काला
स्मेनसवित्रइदं।अध्वर्युस्तूष्णींमंत्रेर्वाहृप्रणीतान्निनयति।। ।इतिदीक्ष
णीया।।सेयंद्विवैवसमापनीया।।एतएवाग्नयऔष्ण्याजिनंसांगंकृष्ण
विषाणांवासोमेखलामौदुंबरंदंडमुष्णीषंच।।प्रतिप्रस्थातापत्न्यैपं
च।।कुंबंकुरीरंवासोयोक्त्रंकुंचप्रयच्छति।।अध्वर्युर्द्विवैवयजमानाय
लेनपुरस्तात्प्रत्यङ्मुखश्चासीनःकृष्णाजिनंप्राचीनग्रीवमुत्तरेलोमो

प्रस्तृणाति ॥ यजमानः पश्चात्प्राङ्मुख उपविश्य कृष्णाजिनस्य शु॰ कृ॰ रूपे
२२ दक्षिणांगुष्ठांगुलीभिः संस्पृशति ॥ ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा
पातमास्य यज्ञस्योदृचः ॥ दक्षिणं जान्वाच्यारोहति ॥ इमां धियꣳ शिक्षमाण
स्य देव क्रतुं दक्षं वरुण संशिशाधि ययाति विश्वा दुरिता तरेम सुतर्माणम
धि नावꣳ रुहेम ॥ उपस्पृश्य प्रागुदङ्मुख आसीनः कटिदेशे मेखलां वेष्टयति ॥
ऊर्गस्यांगिरस्यूर्णम्रदा ऊर्जं मे यच्छ ॥ शिखाबंधनवद्ग्रंथिं करोति ॥ पाहि मामा
मा हिꣳसीः ॥ प्रतिप्रस्थाता योक्त्रेण पत्नीꣳ सन्नह्यति ॥ आशासाना॰ युक्तं ॥
संत्वा नह्यामि पयसा घृतेन संत्वा नह्याम्यप ओषधीभिः ॥ संत्वा नह्यामि प्रज २२

६

स्यांतेशंकुंबध्नाह॥ एतेनकंडूयस्व॥ अध्वर्युर्यजमानायायेदंडंप्रयछति॥ सूप
स्थादेवोवनस्पतिः॥ यजमानःप्रतिगृह्णाति॥ ऊर्ध्वोमापाह्यांहसः॥ अध्वर्युर्य
जमानंवाचयति॥ स्वाहायज्ञंमनसास्वाहाद्यावापृथिवीभ्यांस्वाहोरोरंत
रिक्षात्स्वाहायज्ञंवातादारभे॥ यजमानोमुष्टीकृत्वावाचंयछत्यानक्षत्रोद
यात्॥ अध्वर्युःशालायांतिष्ठन्त्रिरुपांशुस्वाह॥ अदीक्षिष्टायंब्राह्मणो
मुकशर्मामुकगोत्रोमुष्यपुत्रोमुष्यपौत्रोमुष्यनप्तात्तमिंद्रायेंद्राग्निभ्यांव
सुभ्योरुद्रेभ्यआदित्येभ्योविश्वेभ्योदेवेभ्योब्राह्मणेभ्यश्चसोमपेभ्यःप्रब्रू
मः॥ पूर्वयाद्वारावहिर्निष्क्रम्यत्रिरुच्चैःशालामेत्ययजमानंसंशास्ति॥ २३

क्षितोसिदीक्षितवाचंवदसत्यमेववदमानृतंमास्मयिष्ठामाकंडूयथामा
पावृथायदिस्मयासाअपिगृह्यस्मयासैयदिकंडूयासैकृष्णविषाणया
कंडूयासैयदिवाचंविसृजेवैष्णवीमृचमनुद्रवत्तान्मात्वान्यत्रदीक्षितविमिता
त्सूर्योभ्युदियान्माभिनिम्रुक्ताद्यानिदेवतानामानियथाख्यातंतान्याच
क्षीयायान्यदेवतानामानियथाख्यातंतान्याचक्षाणउपरिष्टाद्विचक्षणं
धेहिचनसित्तवंतीविचक्षणवतीवाचंवदकृष्णाजिनमाबध्नवशौथादंडं
ञ्च॥ यजमानःसंस्रुस्थातंवदेत्॥ मुखंप्रछाद्यहासंकुर्यात्॥ अपावृत्तंश्रि

२४ रोनकुर्यात्॥सूर्योदयेसूर्यास्तेचग्रामाद्बहिर्नगच्छेत्॥देवदत्तएहिविचक्षणइतिआ
ह्वानादिकुर्यात्॥चनसितदेवदत्तइदंकुरुविचक्षणइतिकार्यार्थंप्रेषयेत्॥अन्य
त्स्पष्टं॥इतिटीका॥ ॥दीक्षितःस्नानहोमदानजपपाकान्वर्जयेदावस्थात्॥
वासोनजह्यात्॥स्त्रीमधुमांसादिवर्जयेत्॥यजमानःअप्रत्याख्यायिनंप्रतिद्रव्या
हर्तारंप्रेषयति॥विश्वेदेवाअतिमामावहन्त्वनूषासन्यासोमाराधसादेवःसविताव
सोर्वसुदावा॥आहरंतंदृष्ट्वाजपति॥रास्वेयत्सोमाभूयोभरमापृणन्पूर्त्योविरा
धिमाहमायुषा॥हिरण्यंरजतंवाप्रतिगृह्णाति॥चंद्रमसिममभोगोभवाव ५
स्त्रमसीतिवस्त्रं॥उस्रासीतिगां॥हयोसीत्यश्वं॥छागोसीतिछागं॥मेषोसी
तिमेषं॥साक्षादनुक्तंधान्यादि॥प्राजापत्यमसीममेत्यादिरनुषंगः॥अध्वर्युउ २४

८

पाहमध्यसादीक्षितासनेवावाजमस्मे॥अध्वर्युर्यजमानंवाससाप्रोर्णोति॥विष्णोः
शर्मासिशर्मयजमानस्यशर्ममेयच्छ॥वसनच्छिद्रंपश्यन्यजमानंवाचयति॥
नक्षत्राणांमातीकाशात्पाहि॥वसनस्यांतान्शिरस्येकीकृत्योष्णीषेणप्रद
क्षिणंशिरोवेष्टयति॥श्रियोतेशिरोवेष्टयामिश्रियैयशसेब्रह्मवर्चसाय॥प्रति
प्रस्थातापत्न्याशिरसिकुंबंकुरीरंचबध्नातिमूर्ध्नि॥अध्वर्युःकृष्णविषाणां
यजमानायप्रयच्छति॥इंद्रस्ययोनिरसि॥यजमानस्तांप्रतिगृह्णाति॥मामाहिं
सीः॥वसनस्यांतेबध्नातपांतेर्वेदिलोष्ठमुधांति॥कृष्यैत्वासुसस्यायै॥दक्षि
णंकर्णदेशंकंडूयते॥सुपिप्पलाभ्यस्त्वौषधीभ्यः॥प्रतिप्रस्थातापत्न्यावसन

रुध्वरणकाले उत्तरेणाहवनीयं तिष्ठन्संप्रैषमाह ॥ अग्नीज्योतिष्मतः कुरुत नू
दीक्षितवाचंयच्छ पत्निवाचंयच्छ ॥ नोह्यंवकुदारकेति कल्पसारः ॥ दीक्षितः पत्नी
वाचंयच्छत आनक्षत्रदर्शनात् ॥ अध्वर्युः पूर्वया द्वारोपनिष्क्रम्यच तुकृत्तनंदोह
यित्वा यथेतमेत्य जघनेन गार्हपत्यमुपविश्य तूष्णीमुदीचोंगारान्निरूह्य तेषुप
योधिश्रित्याभिघोत्य स्रुवेणापः प्रत्यानीय पुनर्निर्धोत्य त्रिः पर्यग्निकृत्वाम २
क्षणेनालोड्य श्रपयित्वा वर्त्म कुर्वन्नुदगुद्वास्य तस्यांगारान्दशीतिकृत्वोत्त
रेशालाखंडे शिक्य आसजति ॥ प्रतिप्रस्थाता दक्षिणया द्वारोपनिष्क्रम्यान्य

स्यागोश्चतुस्तनं दोहयित्वा यथेतमेत्यान्वाहार्यपचनेऽश्रपयित्वा दक्षिणेन शालाद्वारं
२५ शिक्यमासज्जति ॥ इति पत्नीगावः ॥ यजमानः उदितेषु नक्षत्रेषु दंडं उपलस्याजिने समा
दाय पूर्वया द्वारोपनिष्क्रम्याग्रेण शालां तिष्ठन् भूर्भुवः सुवरिति सकृदुपांशुक्त्वा
व्रतं कृणुतेति त्रिरुच्चैरुक्त्वा वाचं विसृजते ॥ पत्नी च व्रतं ॥ यजमानः आगतानति
थीन्परिचरेत् ॥ चनस्मिन्तेत्युक्तां तैः सह यथेष्टां कथां कृत्वा तां ते विचक्षणेति वेदत् ॥
शयिष्यमाणः स्वायतने कृत्वाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तीर्य कृष्णा
जिनादनंतर्हितो भूमिं परिश्रित्याग्न्यभिमुखः शेते नक्तं जपति ॥ अग्ने त्वं सुजागृ
हि वयं सुमंदिषीमहि ॥ गोपाय नस्स्वस्तये प्रबुधे नः पुनर्ददः ॥ पत्नी जघनेन गार्ह २५

परिश्रितेतूष्णींव्रतयति॥ निर्णिज्यपात्रंप्रयछतः॥ व्रतेनशरीरधारणाशक्तौ
२६ ओदनंधानाःसक्तून्घृतमित्यनुव्रतयेत्॥ अध्वर्युरपररात्रेआगत्योत्तरे
णाहवनीयंतिष्ठन्प्रेष्यति॥ त्रिस्तनंदोहयताग्नीन्ज्योतिष्मतःकुरुतव्र अंतं
त्यवाचंयछपत्निवाचंयछ॥ यजमानःपत्नीचवाचंयछतःआदित्योदयात्॥
अध्वर्युः॥ पूर्ववत्रिस्तनव्रतंदोहयित्वाग्निहोत्रविधिंपूर्ववत्हुत्वाशिक्य
आसजति॥ प्रतिप्रस्थातापूर्ववत्स्त्रुतुस्तनंदोहयित्वापत्न्यैउदितआदित्ये॥
यजमानःपूर्ववद्वाचंविसृजतिपत्नीच॥ ॥अथप्रायणीया॥ शेषंतानाज्य २६

स्रुक्का

भागौ॥ अध्वर्युरेहियजमानेःपूर्वयाद्वाराशालांप्रपाद्ययजमानःयाःपुर
स्तादिस्यादिनिविष्टमित्यंतेज्योतिष्टोमार्थेनप्रायणीयेष्ट्यायक्ष्येइतित्रि
रुपांशुत्रिरुच्चैर्वदेत्॥ तन्मक्षध्यतामित्यादिओंतथेत्यंते॥ प्रायणीयासं
बंधिहविराज्यंव्रीहिमयश्चरुर्द्रव्यं॥ पथ्यास्वस्तिरग्निःसोमःसवितादिति
पांशु रितुप्रधानदेवताःसंघायक्ष्ये॥ इतःप्रभृत्यनुबंध्यांतेनान्वाधानं॥ अध्वर्यु
देवागा॰युज्यनामितिजपित्वेतिकल्पसारः॥ असिदादानादिसमानंमांत्रा पा
सादनात्॥ चरुस्थालीसमेक्षणां~~[illegible]~~नौमासादयेत्॥ अस्मानीच

२८

पक्षेष्ट्यां दृषदुपले इमे क्षण पिष्टोद्वपन्योयोः कमदंतीम न्वाहार्यस्थाली
चवर्जयित्वा समानमाप्रणीताप्रणयनात्॥ पयः पक्षे पयः प्राणे ध्यामीति
प्रैष४॥ समानमानिर्वापात्॥ देवस्यत्वा० ध्याम दित्यै जुष्टं निर्वपामीत्यादि॥
अश्मनापात्राणां समाहननं॥ यज्ञयोगांते स्मार्त्तवदाज्यं संस्कृत्य स्रुवे
णाहवनीये जु[illegible]होति॥ कविर्यज्ञस्य वितनोति पंथां नाकस्य पृष्ठे अधि रो
चने दिवः॥ येन हव्यं वहसि यासि दूत इतः प्रचेता अमृतः सनीयान् स्वा
हा॥ कवय इदं॥ अध्वर्युः पूर्वया द्वारा निष्क्रम्य संप्रैषमाह॥ सोम २८



पत्नमग्निष्वात्तिमुखा सं विशंति तत्स्त्री॥ अध्वर्युर्मध्यरात्रे यजमानं प्रतिबोध्य वाचय
ति॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा॥ त्वं यज्ञेष्वीड्यः॥ यजमानः॥ अपर्यामाति॥ आ
दैवीं धियं मनामहे सुमृडीकामभिष्टये॥ वर्चोधां यज्ञवाहसं सुपारा नो असद्
वशे॥ कंसे व्रतं पूर्वदुग्धं सर्वमानीयाध्वर्युणा दत्तं स्वायतनेन परिश्रित्य कंसेनाल्पं
व्रतयति॥ ये देवा मनोजाता मनोयुजः सुदक्षा दक्षपितारस्ते नः पांतु ते नोवंतु तेभ्यो
नमस्तेभ्यः स्वाहा॥ शेषं तत्स्त्री व्रतयति॥ आचम्य जपति॥ शिवाः पीता भवथ यू
यमापोस्माकं योनावुदरे सुशेवाः॥ इरावतीरनमीवा अनागसः स्वस्ति नो भवथ जी गा
वसे॥ पत्नी प्रतिप्रस्थाता पूर्वदुग्धं व्रतं कंसे सर्वमानीय दत्तं जघनेन गार्हपत्यम

विक्रयि स्सोमं शोधयेपरवाणीकाले रोहिते चर्मण्यानडुहे प्राग्नं
ते ब्राह्मणो दक्षिणत आस्तां मा गावो दूरं मा उगुर्य्या सुसोमक्रयणी
च सोमवाहनावनडुहौ सोमवाहनमनः प्रक्षालयतो ऽ तफलकं॥ब्रा स्व
व ह्मणः सोमविक्रयी उपरदेशे उदकुंभं निधायं कंचिद्ब्राह्मणं दक्षि
णत उपविश्यैकपर्वाणं त्रिपर्वाणं वा दूर्वा रोहिते चर्मण्यानडुहे तृणा
दिभ्यः शोधयेत्॥अन्यथा यथासंप्रैषं कुर्वंति॥अध्वर्युर्यथेतमेत्य घृ
ष्यादग्नाद्दितिरः पवित्रं स्थाल्यां प्रणीता ... आनीय ध्रुवासीति
जलमा
ध्रुवासिपृथिवीं दृंह

स्थालीमधिश्रित्यैतांप्रदक्षिणमंगारैः परिचिनुयात्॥ भिर्दग्धमिति॥
२८ भृगूणा॰ यानिघर्मे इतिचनस्तु॥ न सति पाद्यस्यसाक्षाद्धविःसा
धनस्यत्तापस्यघर्मस्यचस्थाल्यांसंभावात्॥ घर्मोस्थविश्वायुर्ब्रह्मात
तंदुलान्प्रक्षिप्याज्यंनिरूप्य॥ अंतरित०॥ देवस्त्वा० रक्षस्त्वा॥ अवि० यत॥
एकतायेत्यादिनास्ति॥ अयंवेदइत्यादिसमानमास्रुक्संमार्जनप्रह
रणात्॥ पत्नीवर्जंप्रेषः॥ आशासानाइत्यादिनास्ति॥ अग्नेगृहपत
इत्यादिसमानमाइध्मसनात्॥ आप्यायतांघृतयो०॥ तेजस्सादिस्ये २८

श्रीग

१२

रोरवदाय। हविरभिघार्यमेक्षणंस्रुचौरधोनीताग्नीधेप्रयच्छन्नाह॥ अति
वालयतादेवमनुप्रहार्षीः॥ अस्याःक्रमणादिहोमांते॥ आग्नीध्रः मेक्षणमाहव
नीयापरिप्रांचंनीत्वाहविरभ्युक्ष्याहवनीयस्योत्तरत उदयनीयायसादयति॥
समानमिडावदानात्॥ इडामुपस्तीर्यध्रुवाज्याद्दृष्टरूत्वाद्विस्त्रेरास्वदायाभि
घारयति॥ नचतुर्धाकरणं॥ नपुरोडाशंबर्हिषदंकरोतीतिवचनात्॥ हविर
द्रासनांतेरूत्वाह॥ अनुछिष्टंकुर्वन्नेतंचरुंस्रुवधृत्यप्राश्नीनाथैतांचरुस्था
द्व लीसक्षामकाषामेतन्मेक्षणमेतंवेदमेतं हिश्वतुष्टयमुदयनीयायनिधत्तात्॥ २९
अग्निसंमार्गानंतरंयजमानश्चाहेतिकल्पसारः॥ परिकर्मिणश्च रुंस्रुवधृत्या श्री

नुछिष्टीकुर्वंतः प्राश्नंति॥ स्रुग्विमोकांते स्थाल्यादिस्थापयंति॥ अध्वर्युः
प्रेक्षन्नस्थाल्यामिड्यादिस्रुग्विमोकांतंकरोति॥ फलीकरणान्युत्करे
निरस्यति॥ श्वोतरेऽदर्शनात्॥ प्रतिपत्तेरावश्यकत्वात्इध्मप्रव्रश्चनानि
तूष्णीमन्वाहार्यपचनेऽभ्यादधाति॥ एवमुत्तरत्र॥ अध्वर्युस्तूष्णीमंतर्वेदि
प्रणीतानिनयतितूष्णींध्रुवामाप्याययति॥ ॥इतिप्रायणीया॥ ॥अथ
सोमक्रयः॥ ॥अथाध्वर्युर्ध्रुवाज्यात्स्रुचिचतुर्गृहीतंगृहीत्वास्त्र्येणहिरण्यं
निष्टर्क्यंबध्वादर्भमसूलेनसग्रथ्यस्रुच्यवदधाति॥ इयतेरुक्कृत्तनरि

देवर्चस्तयासंभवभ्राजंगछ॥दर्भमुत्तरंस्रुवदंडेउपसंगृह्याहवनीयेजुहो
३० त्यन्वारब्धेयजमाने॥ऊर्गसिघृतामनसोजुष्टाविस्नेवेतस्यास्तेसत्यसव
सःप्रसवेवाचोयंत्रमशीयस्वाहा॥वाचेसोमक्रयण्यादद्यं॥सोमक्रयणी
देवतेतिदेवः॥अपरंचतुर्गृहीतंगृहीत्वाचत्वारिस्फ्यमुद्पात्रंबर्हिर्हिर
ण्यमादाय॥एहियजमानइत्युक्त्वापूर्वयाद्वारोपनिष्क्रामति॥तस्यपश्चाद्घेद
मानोगार्हपत्याहवनीययोरंतरेणोत्तरतएत्यगछति॥तस्यपश्चात्प
त्नीपद्धरणीमादायगछति॥अध्वर्युरग्रेणशालांतिष्ठन्चतुर्गृहीतं
यजमानमवेक्षयति॥शुक्रमस्यमृतमसिवैश्वदेवंहविः॥यजमानोपि ३०

१४

जुष्टमभिघारयामि॥ऋतउत्सनाति०नां॥आर्द्रोभुवनस्यगोपाः॥यस्तेत्रा
तेतिनास्ति॥चरूमासादयति॥सूर्यंतेचक्षुः॥वातंप्राणः॥द्यांपृष्ठं॥अंतरिक्ष
मात्मा॥अंगैर्यज्ञं॥पृथिवीं॰शरीरैः॥समानमाप्रयाजेभ्यः॥आज्यभागौवात्र भा
दर्धमभिघारणंनास्ति॥प्रयाजशेषेणचतुःकृत्वोध्रुवामभिघार्यचरुमुपस्त
तंचाभिघारयति॥ध्रुवाज्याच्चतुर्गृहीतेप्रदक्षिणंपूर्वादिक्षुपथ्यांस्वस्तिंअ
ग्निंसोमंसवितारंचोपांशुयजतिसर्वत्रदाक्षिरसीत्यनुमंत्रणंमध्येदितिंच
रुणोपांशु॥अदित्याअहंदेवयायासोमुच्येयं॥अध्वर्युः॥मरुतोयस्यहिक्षयेदिवस्सु ६
पुज्य म्नायंतोहवामहे॥आतूनउपगंतन॥स्विष्टकृतउपस्तीर्यचतुर्ध्रुवाज्यात्सकृच्च

मंत्रंब्रूयादितिकल्पसारः॥हिरण्येनव्यवधायादित्यमवेक्षयति॥सूर्य
स्यचक्षुरारुहमग्नेरक्ष्णःकनीनिकांयदेतशेभिरीयसेभ्राजमानोविप
श्चिता॥सोमक्रयणीमग्रेणशालांसदसिस्पृष्ट्वायायाउदीचीमानीताम
नुमंत्रयते॥चिदसिमनासिधीरसिदक्षिणासियज्ञियासिक्षत्रियास्यदि पा
तिरस्युभयतःशीर्ष्णीसानःसुप्राचीसुप्रतीचीसंभवमित्रस्त्वापदि
बध्नातुपूषाध्वनःपात्विंद्रायाध्यक्षायानुत्वामातामन्यतामनुपितानु
भ्रातासगर्भ्योनुसखासयूथ्यःसादेविदेवमच्छेहींद्रायसोमंरुद्रस्त्वा स
वर्तयतुमित्रस्यपथास्वस्तिसोमसखापुनरेहिसहरय्या॥प्रेष्यति।द

क्षिणस्येर्मस्य सप्तमं पदं जोषयध्वं ॥ तस्या उदङ्ङीयमानायाअग्निमद
२१ क्षिणपादस्य षट्‌पदं निषड्ढि मैत्रैरनुक्रामति ॥ वस्व्यासि ॥ रुद्रासि ॥ अ
दितिरसि ॥ आदित्यासि ॥ शुक्रासि ॥ चंद्रासि ॥ सं मं हस्तेन स्पृशति ॥ म३
शुभं बृहस्पतिस्त्वा रण्वतु रुद्रो वसुभिराचिकेतु ॥ पदे हिरण्यं निधायप
रिस्तीर्य परिषिच्य चतुर्गृहीतं जुहोति ॥ पृथिव्यास्त्वा मूर्धन्नाजिघर्मि
देवयजन इडायाः पदे घृतवति स्वाहा ॥ वाचे सोमक्रयण्याइदं ॥ हि
रण्यमपनीय स्फ्येन पदं त्रिः परिलिखति ॥ परिलिखितं रक्षः पारि
लिखिता अरातय इदमहं रक्षसो ग्रीवा अपिकृंतामि यो स्मांद्वेष्टि २१

र्थुः पदद्रोस्थित्वा सप्तयां वर्तति ॥ चंद्रं छागां शुल्कस्य स्तोर्णपात्स्कके उष्णी
षं वाससी लक्ष्या ॥ जिने सोमक्रयणीं च परिक्रम्य हस्तादादायोपरवदेरां
ग त्वा पृच्छति ॥ सोमविक्रयीं इच्छु ध्वस्ते सोमा ३ः क्लु तिः ॥ असावाह क्रुध्नः ॥
यजमानो राजानमुपतिष्ठते ॥ एषते गायत्रो भाग इति मे सोमाय ब्रूता
देषते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेषते जागतो भाग इति मे सो
माय ब्रूताच्छंदोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतात् ॥ अध्वर्यु
र्द्विगुणं वास उत्तरलोम्नश्चर्मण उत्तरार्धे प्राचीनदशं उपस्तीर्य ॥ हि ३२

रण्यवता पाणिना राजानामभिमृशति ॥ अꣳशुनाते अꣳशुः पृच्य
तां परुषा परुर्गंधस्ते कामं मवतु मदाय रसो अच्युतो ऽमात्यो ऽसि शुक्र
स्ते ग्रहः ॥ प्रदेशिन्योपकनिष्ठिकया प्रदेशिन्या कनिष्ठया मध्यमया
प्रत्येकं सांगुष्ठया क्रमेण राजानं मिमीते ॥ अभि त्यं देवꣳ सवितारमू
३८ ण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियं मतिं मूर्ध्वा यस्या
मतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा
सुवः ॥ प्रतिमुष्टिं मंत्रावृत्तिः ॥ कनिष्ठिकया मध्यमया कनिष्ठिकया प्रदे

द्विन्यामहानाम्न्याप्रत्येकसांगुष्ठयाक्रमेणतत्स्तीर्मिमीते॥एवमर्धंराजा
२२ नंमीत्वाविशिष्टंमितेराशिप्रक्षिपति॥प्रजाभ्यस्त्वा॥सैवेनस्यांतानेकीकृ
त्यप्रदक्षिणमुस्णीषेणबध्नाति॥प्राणायत्वा॥अंतावुपगृहति॥व्याना
यत्वा॥राज्ञमुपरिष्टादंगुल्यावकाशंकृत्वायजमानमवेक्षयति॥प्रजास्त्व
मनुप्राणिहिप्रजास्त्वामनुप्राणंतु॥राजानंचर्मणिनिधायसोमविक्रयि
णोपादत्तेचर्मास्युक्ष्योदूष्योक्षायपृच्छति॥सोमविक्रयिन्क्रय्यस्तेसो
मा३॥सआहक्रय्यः॥अध्वर्युःमूजवता३॥सआहमूजवतोहिमूज
वत्स्वर्वेनादाहृतइतिध्यायेत्॥अध्वर्युःसोमक्रयण्यापणते॥गवातेक्रीणा॥ २२

१०

चेवयंहृष्पदुक्षमस्यग्रीवाअपिहृंतामित्रिरितिकृत्यसारः॥पदस्ययावदा
ईत्रिःस्फ्येनोपसंगृह्यपक्षरण्यांसंवपति॥अस्मेरायः॥त्रिर्मंत्रः॥पक्षर
णीयजमानायप्रयच्छति॥त्वेरायः॥यजमानःपत्न्यै॥तोतेरायः॥पत्नी
सोमक्रयण्यासमीक्षयति॥संदेविदेव्योर्वश्यापश्यस्व॥पत्नीयजमाने
मीक्षते॥त्वष्टीमतीतेसपेयसुरेतारेतोदधानावीरंविदेयतवसंदृशि॥य
जमानःसोमक्रयणीमीक्षते॥माहंरायस्पोषेणवियोषं॥अध्वर्युर्हि
रण्यंप्रक्षाल्यदक्षिणहस्तमध्यमांगुलौबध्वापददेशेअपोनिनीय॥नयति
सोमक्रयणींनयंतिपत्नीं॥पदपांस्त्रेधाविभज्यप्रज्ञातंनिदधाति॥अध्व

मि॥ सोमविक्रय्यआँह क्रीतःसोमः॥ वयांसिव्याचक्ष्व॥ अध्वर्युराह॥ एषा
तेसोमक्रयणी चंद्रंतेछागास्तेवस्त्रंते॥ हिरण्येन पणते॥ सोमंते क्रीणाम्यू
र्जस्वंतं पयस्वंतंवीर्यावंतमभिमातिषाहं॥ शुक्रंते शुक्रेण क्रीणामि चं
द्रंचंद्रेणामृतममृतेनसम्यत्तेगोः॥ हिरण्यंदत्त्वायित्वापुनर्गृहीत्वायज
मानायप्रयच्छति॥ अस्मेचंद्राणि॥ प्रतीचीनयावयाजयापणते॥ तप॥ सस्त
नूरसिप्रजापतेर्वर्णस्तस्यास्तेसहस्रपोषंपुष्येयंश्चरमेणपशुनाक्रीणामि॥ सा
यजमानमीक्षते॥ अस्मेतेबंधुः॥ आत्मानं॥ मयितेरायःश्रयंतां॥ अजांप्रद
क्षिणमाहृत्याभ्युक्ष्योदीचींसोमविक्रयिणेदत्वावस्त्रंचतुर्थदत्वातस्माद्राजानमा

दत्ते॥ मित्रो न एहि सुमित्रधाः॥ अत्र पूर्वौ ब्रह्म यजमानौ दक्षिणत आसेते ब्र
३४ ह्मासे ममादाय यजमानस्य दक्षिणे ऊरौ सादयति॥ इंद्रस्यारूमाविश दक्षि
णमुशंतमुशंतं स्योनः स्योनं॥ इदमाश्वलायन ब्राह्मणे नास्ति॥ यजमानः
कृष्ण विषाणयोष्णीषमपनयति॥ वयः सुपर्णा उपसेदुरिंद्रं प्रियमेधा ऋ
षयो नाधमानाः॥ अप ध्वांतमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धा
न्॥ उष्णीषमध्वर्युः कृष्ण परिकर्मिणे ददाति॥ न द्रौमैत्रावरुणाय दंडं ददाति॥
तदाध्वर्युर्यजमानं वाचयति॥ त्वा गावो वृणत राज्याय त्वां हवंत मरुतः॥
स्वर्का वर्ष्मन्क्षत्रस्य ककुभि श्रियाणस्ततो न उग्रो विभजा वसूनि॥ मित्रावरु ३४
शि
ई

सोमक्रयिणं स्तुवोर्मध्ये विध्यति ॥ सोमविक्रयिणि तमः ॥ सोमक्रय
णानतु दिशति ॥ स्वान भ्राजांघारे बंभारे हस्त सुहस्त कृशानवेते
वः सोमक्रयणास्तान्रक्षध्वं मावोदभन् ॥ उदकुंभमनु परिप्रवर्त्त
यति ॥ यजमानो राजानमादायोपोत्तिष्ठति ॥ उदायुषा स्वायु
षोदोषधीनां रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृतां अ
नु ॥ सोमक्रयस्थानस्य दक्षिणतः पूर्वमेवस्थापितं प्राऽऽउग्रु = ३५

खयुगरशनोपस्तंभनादियुतमनः प्रतिसोमं शिरसि । नि
धाय गच्छति ॥ उर्वंतरिक्षमन्विहि ॥ अध्वर्युरनसि पश्चाद्दक्षं
कृष्णाजिनमास्तृणाति ॥ अदित्याः सदोसि ॥ आस्तरणं य
३ जमानमिँत्तिकल्पसारः ॥ यजमानः कृष्णाजिने राजानं सा
दयति ॥ अदित्याः सदआसीद ॥ राजानमुपतिष्ठते ॥ अ

३६ स्तभ्नाद्यामृषभोअंतरिक्षममिमीतवरिमाणंपृथिव्याऽ
आसीदद्विश्वाभुवनानिसंम्राड्विश्वेत्तानिवरुणस्यव्रतानि॥
अध्वर्युरजानंवाससप्रागवर्जंसर्वतोवेष्टयति॥वनेषु
व्यंतरिक्षंततानवाजमर्वत्सुपयोअस्रियासु॥हृत्सुक्रतुंवरु
णोविक्ष्वग्निंदिविसूर्यमदधात्सोममद्रौ॥कृष्णाजिनमंतर्लोमोर्ध्वग्रीवंपुरस्ता

३६

२०

णयोस्वाप्रग्राक्ष्योः प्रतिशाषाग्रयच्छामीतिदानेमंत्रः॥मित्रा॰शिषाप्र
तिगृह्णामीतिप्रतिग्रहमंत्रः॥आश्वलायनेयजमानेइहदंडदानंनभ
वति॥होत्राकरिष्यमाणत्वात्॥एवमन्यशाखिन्यपियजमानेआश्व
लायनहोत्रेक्रियमाणेत्रदंडदानंनभवति॥एतस्यसर्वोक्तहोत्रादे
सावकाशत्वात्॥अध्वर्युःकृष्णाम्बूर्णास्तुकांयजमानशिरसि
निदधाति॥अस्मेज्योतिः४॥हस्ताम्बूर्णास्तुकांसंश्लिष्टबंधनां
करोति॥इदमहंसर्पाणांदंदशूकानांग्रीवाउपमथ्नामि॥तया

द्धाति।।उदुत्यं•तव:।दृशेविश्वायसूर्यं।। सोमवाहनावानीयमानेप्रतिमंत्र
यते।उस्त्रावेतंधूर्षाहावनश्रूअवीरहणौब्रह्मचोदनौ।दक्षिणंयुनक्ति।वरुण
म स्यस्कंभनमसि।।उम्यौवबरुहाति।वरुणस्यस्कंभसर्जनमसि।।याक्रमवगूह
ति।प्रत्यस्तोवरुणस्यपाशः।। एवमुत्तरंयुनक्ति।दक्षिणामीषामन्वारभ्याह।
सोमायक्रीतायप्रोह्यमाणायानुब्रू३हि।।सुब्रह्मण्यसुब्रह्मण्यामाह्वयमा
नुत्वमाह्वार्य जमानआह्वास्पाक।।यजमानोंतरेपोषाति छत्रपलाशशाखांवा
धारयन्सुब्रह्मण्यो३इतित्रिरुपांश्वाकुर्यात्।।सुब्रह्मण्यपरेत्तथैवोच्चैस्त्रि
राह्वयति।।होत्राप्रथमायामृचिअभिरुक्तायां।यजमानेक्ष्यालयति।अध्व
र्योर्मंत्रः।प्रच्यवस्वभुवस्पतेविश्वान्यभिधामानिमात्वापरिपरी विद
न्मात्वापरिपंथिनोविदन्मात्वावृकाअघायवोमागंधर्वोविश्वावसुराध

३७ घच्छेयेनोपकृत्यापरोप तयजमानस्यनेगोहेदेवैःसधस्कृतं।।दक्षिणामुखम
नःपरिवर्त्यपरिवर्त्तेति।।अध्वर्युर्यजमानंवाजसनेवप्रतीचींगछतः।।यजमा
नस्यस्वुस्यये नृपायिपं थामगस्माहिस्याहस्तगामनेहसं येनाविम्वाःपरि द्वि
षोवृणक्ति विंदतेवसु।।उभयोमंत्रः।।अध्वर्युश्रेष्ठीनूरणीराजासंदीचादायसो
मंप्रतिमंत्रयते।।नमोमित्रस्य० इतःसपर्यत दूरेदृशे दे० यज्ञाःस्त।।शालायाः
पुरस्तादुदगग्रस्यानसोग्रंस्थाप्यायास्थापयोत।।वरुणस्यस्कंभनमसि।।द
क्षिणस्यानडुहःशम्याम पकर्षति।।वरुणस्यस्कंभसर्जनमसि।।योक्त्रेपाशौ
विमुंचति।।उन्मुक्तोवरुणस्यपाशः।।इतिसोमक्रयः।।अथातिथ्येडांता।।अ
ध्वर्युरेहियजमानेत्युक्त्वा पूर्वयाद्वाराशालांप्रपाद्ययजमानोगार्हपत्याहव
नीययोरंतरेणोत्तरतएत्यजघनेनगार्हपत्यमुपविश्यपयाःपुरस्तादित्यादि ३७

पत्न्यामनुमंत्रं श्रीहिषां पंचमुष्टीर्निर्वपति ।। देवस्यत्वा० भ्यामग्नेरातिथ्य
मसि विष्णवेत्वाजुष्टं निर्वपामि ।। देवस्यत्वा० भ्यां सोमस्यातिथ्यमसि०
मि ।। देवस्यत्वा० भ्यामतिथेरातिथ्यमसि० मि ।। देवस्यत्वाभ्यामग्नयेत्वारा
यस्पोषदावुन्नेविष्णवेत्वा० मि ।। देवस्यत्वा० भ्यां श्येनायत्वासोमभृतेविष्णवे० दे
मि ।। नात्रसमंत्रकं निर्वपणमितिकल्पसारः ।। प्रोक्षणादिषु ।। देवस्यत्वा०
हस्ताभ्यां विष्णवे वो जुष्टं मित्यादितंडुलप्रक्षालनोन्निनयनांतं कृत्वोन्नस्या २
नडुहः ।। शम्यामपकर्षति ।। वरुणस्यस्कंभसर्जनमसि ।। योक्त्रं विमुंचति ।।
उन्मुक्तोवरुणस्यपाशः ।। चत्वारो ब्राह्मणा आसंदीमादाय शालां प्रविशंति ।।
यजमानो गार्हपत्याहवनीययोरंतरेण शालातो बहिर्गत्वा राजानमादत्ते ।।
यातेधामानिहविषायजंति तातेविश्वापरिभूरस्तुयज्ञं ।। शालांप्रपाद ३८

यति ।। गयस्फानः प्रतरणः सुवीरोवीरहा प्रचरासोमदुर्यान् ।। तस्यपश्चादु
श्चुदपात्रेण ब्राह्मणा आसंदीमंतरेणवेद्युत्करौ नीत्वाग्रेणाहवनीयं पर्या
णीय दक्षिणतो निदधाति ।। अध्वर्युस्तस्यां कृष्णाजिनमास्तृणाति ।। अ
दित्याः सदोसि ।। यजमानोंतरेणवेद्युत्करौ राजानं प्रपाद्याग्रेणाहवनीयं
पर्याणीय कृष्णाजिने सादयति ।। अदित्याः सद आसीद ।। राजानमुपाति
ष्ठते ।। वरुणोसि धृतव्रतो वारुणमसि ।। अध्वर्युः कृष्णाजिनांतानेकीस
त्यरज्वाबध्वा वंशे प्रग्रथ्नाति ।। शंयोर्देवानांध्रुस व्यस्यात् ।। आसंद्याउ
परपाद्यो मध्येन जलं सिंचति ।। मादेवानामपसश्छित्स्महि ।। भद्रः राज्ञः
पादौ प्रक्षालयामीति ध्यायन् ।। तज्जलं गृहीत्वा तत्रैव सिंचति ।। यज
मानः राजानमुपतिष्ठते ।। तत्वायामि० प्रमोषीः ।। अध्वर्युराह ।। माराजा

नं चाहवनीयं चांतरेणाकम्य न संचारी न्यैनं॥ सायुधोमासदंडोमासछत्रोमा
३९ सोष्णीषोमासाधस्याघोनुप्रपादात्॥ यजमानोमधुपर्केणप्रजयति। आश्व
लायनयजमानस्यमधुपर्कस्वीयेतिकर्तव्यतायास्त्रांतरोक्तेऽग्नागारेषयादो
स्वसूत्रोक्तेइतिकर्तव्यतायाइवग्रहणप्रतिग्रहमंत्रान्स्वयमेववदेत्॥ अ
ध्वर्युः कृष्णाजिनावधूननादिपुरोडाशेनसहअन्याइतिदेवः। मदंतीरधि
श्रयति॥ प्रोक्षणीरासादये॰ संमृद्धाज्येनोदेहीतिशेषः। चतुर्गृहीतानिपं
चगृहीतानिवाज्यानिगृण्हाति॥ पंचगृहीतपक्षेअध्वर्योमैत्रावरुणिः। य
जमानानुमंत्रणेचतुर्थस्यावृत्तिः। स्तरणकालेउपसदग्नीषोमार्थतया
संकल्पः। अतमातिथ्यमंतर्वेद्यामासादयति॥ पृथिवीहोता। द्यौरध्व
र्युः। रुद्रोग्नीत्॥ बृहस्पतिरुपवक्ता॥ स्योनोमेसीद॰। ऋषभोसिव्यमेअ ३९

निविष्टमित्यंतेज्ये॥ तिषोमार्थेनातिथ्येष्ट्यायक्ष्येइतित्रिरुपांशुत्रिरुच्चैर्वदेत्॥
तन्मंत्रस्थ्यतामित्यादि॰ तथेस्यंते आतिथ्यासंबंधिहविः ब्रीहिमयः पुरोडाशो
द्रव्यं पंचप्रयाजाः। अग्नीषोमावाज्यभागौ॥ विष्णुः प्रधानदेवता आज्यपा
अग्निः स्विष्टकृत्॥ एवमात्मकेन कर्मणासद्योयक्ष्ये। गार्हपत्याहवनीययो
रंतरेणदक्षिणतोगत्वा॥ स्वायतनेउपविशति॥ अध्वर्युर्देवागातुविदइतिज
पित्वेतिकल्पसारः॥ अंसिदादानादिबर्हिःसंभरणकालेउपसदग्नीषोमी
यार्थतयासंकल्पः॥ प्राग्वत्कालप्रस्तारः॥ पंचविधं वर्हिःदेवाविधृती
काष्मर्यमयाः परिधयः॥ ततस्त्वां त्रयोविंशतिधेत्यूहः। वेदंकृत्वापा
णिसंमर्शनादि। पात्रासादनेनवकपालान्यासाद्ययोग्यान्याहार्यस्थाली
वर्जमितराणिसादयति॥ समानमग्निर्वपात्॥ अन्वारब्धायांस्रुचि

इत्यंते। अध्वर्युः संभारानाचष्टे। अग्निर्यजुर्भिः। सविता स्तोमैः। इंद्र उक्थामदैः।
मित्रावरुणावाशिषा। अंगिरसो। धिष्ण्यैरग्निभिः। मरुतः सदोहविर्धा
नाभ्यां। आपः प्रोक्षणीभिः। ओषधयो बर्हिषा। अदितिर्वेद्या। सोमो दीक्ष
या। त्वष्टेध्मेन। विष्णुर्यज्ञेन। वसव आज्येन। आदित्या दक्षिणाभिः। वि
श्वेदेवा ऊर्जा। पूषा स्वगाकारेण। बृहस्पतिः पुरोधया। प्रजापतिरुद्गीथेन।
अंतरिक्षं पवित्रेण। वायुः पात्रैः। अहं श्रद्धया। उत्करे कृष्णा अनमा
स्तौ वर्धिमंथन शकलं प्राणाय तं निदधाति। अग्नेर्जनित्रमसि।
तस्य दक्षिणोत्तरयोस्त्वाथैवद्धे। वृषणौ स्थः। दक्षिणेनोत्तरारणिं स
व्येनाधरारणिमादत्ते। उर्वश्यस्यायुरसि पुरूरवाः।। अ पूर्वाज्यस्था
ल्याज्येन समनक्ति।। घृतेनाक्ते वृषणं दधाथां।। यजमानं वाचयति।।

गायत्रं छंदोनुप्रजायस्व त्रैष्टुभं छंदोनुप्रजायस्व जागतं छंदोनुप्रजायस्व।
४० होतारमाह। अग्नये मथ्यमानायानुब्रू३हि। मथित्वा जातेयावाह। जाता
यानुब्रू३हि। प्रहरन्नाह। प्रह्रियमाणायानुब्रू३हि। यजमानेनान्वारब्धो
ग्निमाहवनीये प्रहरति। भवतंनः समनसौ समोकसावरेपसौ।। मायज्ञं
हिंसिष्टं मायज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः। अध्वर्युरपूर्वज्येनस्रु
वेणाजुहोति। अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः। स्वाहाकृ
त्य ब्रह्मणा ते जुहोमि मा देवानां मिथुया कर्भागधेयं स्वाहा।। प्रविष्टायाग्नं
अध्वर्युर्हीतरेहीत्यादिना समिधं शिनष्टि।। चतुर्थे प्रयाजे सर्वमौपभृतं समान
यति।। प्रयाजशेषेण नोपभृतमभिघारयति। आज्यभागाविष्ट्वा पांस्रुहविष्क
चरति।। विष्णवेनुब्रूहीत्यादि।। विष्णवइदं०। विष्णोरहं देवयज्यया। शापाविष्टे। ४०

ध्वर्यू उपहवस्व। ब्रह्मन्नुपहवस्व। होतरुपह्व॰ उद्गातरुप॰ सदस्य उप॰ ब्राह्मणाच्छंसि॰
४१ मैत्रावरुण॰ प्रस्तोतरु॰ नेष्टः॰ अग्नीदु॰ अच्छावाक उ॰ प्रतिहर्तरु॰ उन्नेतरु॰ पोतरु॰
ग्रावस्तुदु॰ सुब्रह्मण्योपह्वयस्वेति क्रमेणोपहवमिष्ट्वा। अश्वाज घ्नति। प्रजापते त्वा
मनसि जुहोमि। सर्वेषां मंत्रः। क्रमो यमेवोपहवे प्रश्नो इति कल्पसारोदितस्तत्र
सदृशो वाजिनभक्षस्तत्रैव तथा व्याख्यानाच्च। उपहवस्य भक्षसंबंधि प्रदर्शनाच्चे
तेन ऋत्विजां अवघ्राणस्य केषांचिद् लेखने मूलं चिंत्यं।। अथैनमदुः संमज्य
शालाया उत्तरतो निदधाति। अध्वर्युराह। अग्नीमदंत्यापा३ः प्रश्नेप्लुतिः। आग्नी
ध्र आह। मदंति देवीरमृता ऋतावृधः। अध्वर्युराह। ताभिराद्रव। आग्नीध्रः। मदंती
राहरति। सर्वे ऋत्विजः यजमानश्च मदंतीः स्पृष्ट्वा राजानं विस्रस्य मदंतीभिराप्याय
यंति। अंशुरंशुष्टे देव सोमाप्यायतामिंद्रायैकधनविद आ तुभ्यमिंद्रः प्यायतामा त्व ४१

मिंद्रायप्यायस्वाप्याययास्मान्सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामुदृच
मशीय। इतः प्रभृति अउपसदो मदंतीभिरुदकोपस्पर्शनं एतदाश्वलायनेय जमाने।
राजाप्यायनं स्पृष्ट्वादकं राजानमाप्याययंतीत्याश्वलायनेन विशेषविधानात्। सर्वे ऋ सा
त्विजः इति केरवस्वामिः। उपोत्थाय राजानं विस्रस्य तत्राहिरण्यं निधाय। अंशु
रंशुस्ते॰ तामा त्वमिंद्राय प्यायस्वेत्याप्यायनं बौधायने यजमाने अध्वर्युर्यजमानं वा
चयति। आप्यायय सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीय। मदंतीः
स्पृष्ट्वा यथायतनमुपविशंति। अध्वर्युरेव वाजवतीभ्यां स्रुचौ व्यूह्य परिधी
न्संमृज्य यथायतनं स्रुचौ सादयित्वा विधृतीभ्यां सह प्रस्तरं गृहीत्वा। आज
जन्मत्रे धानकि। अक्षन्नमीमदंत। धियं तु वयं। प्रजां योनिं मा निर्मृक्षं आश्रवण
दिनास्ति। प्रस्तरं दक्षिणार्धवेदौ निदधाति। मदंतीः स्पृष्ट्वा सर्वे ऋत्विजः यजमान

प्रस्तरे दक्षिणपाण्यानुत्तानान्सव्यांनीचोनिधाय मनसा नमस्कुर्वंति। एष्टा रायए

४२ ष्टा वामा भि प्रेषप्रगाय॥ ऋतमृत वादिभ्यो नमो दिवे नमः पृथिव्यै। एष्टा रायः प्रेषेभ

गाय तर्मतवादिभ्यो नमो दिवे नमः पृथिव्यै। अध्वर्युर्विधृतीभ्यां प्रस्तरेण सह बर्हिर्याव

न्मात्रं अनुपयुक्तं ब्ध्वा परिधिषु एकादश समिच्छकलानुपसंगृह्य तद्धृत्वा आहव

नीये ति वा त्याप्रिरस्यु ब्ध्वोत्तरतः सादयित्वा परिभोजनीयं वेदं च रूला यजमानं प्रत्या

ह। अवांतरदीक्षां गृह्णीष्व। यजमान आहवनीयमुपतिष्ठते। अग्ने व्रतपते त्वं व्रता

नां व्रतपतिरसि। या मम तनूरेषा सा त्वयि या तव तनूरियं सा मयि सह नौ व्रतपते

व्रतिनो व्रतानि। अध्वर्युः संशास्ति। संतरां मेखलां समायच्छस्व संतरां मुष्टीकुरुष्व

तप्तव्रतं एधि मदंतीभिर्मार्जयस्वोष्णव्रतमन्वसृजं पातेअग्नेरुद्धियो तनूस्तया नः

पाहि तस्यास्ते स्वाहा। इत्येतेनातोधिव्रतया। यजमानः मेखलां मुष्टी च संहत ४२

तरां करोति। उष्णोदकेनाचमनादि करोति॥ ॥अध्वर्युब्रह्मप्रतिप्रस्थातृहोत्राग्नीध

त्रयास्तु। स्विष्टकृदिडेन प्रचर्य मार्जयित्वा प्राशित्रं परिहृत्य तद्भी मंत्रं वेदि प्रणीता

निनयाभि॥ ॥इत्यातिथ्या॥ ॥अध्वर्युस्तत्र ध्रौवमाप्याय्य वेद्यां कंसं निधाय

तस्मिन्सर्वं ध्रुवाज्यं स्रुवेण पंचकृत्वो गृह्णाति। आपतये त्वा गृह्णामि। परिपतये त्वा

गृह्णामि। तनूनप्त्रे त्वा गृह्णामि। शाक्वराय त्वा गृह्णामि। शक्मन्नोजिष्ठाय त्वा गृह्णामि।

सर्वे ऋत्विजः सयजमानाः स्वयमेव तदाज्यमभिमृशंति। अनाधृष्टमस्यनाधृष्यं

देवानामोजोभिशस्तिपाः। अनभिशस्त्यंजसा सत्यमुपगेषं स्विते मा धाः॥

एतदाश्वलायनेयजमाने तान्ननुक्रमिष्यंते भैरांता त्वाश्वलायनसूत्रात्। अ म

नाधृष्टमस्यनाधृष्यं देवानामोजोनभिशस्तिपा अनभिशस्तेन्यं। इत्यबोधा

पनेयजमानमंत्रो विशेषः। अध्वर्युर्यजमानं वाचयति। अनु मे दीक्षां दीक्षापति

र्मन्यतामनु तपस्तपस्पतिरंजसा सत्यमुपगेषं स्विते मा धाः॥ यजमानः अ

जमानाः प्रवर्ग्यसंबंधाः सर्वे इति केशवस्वामिनः ॥ मदंतीरुपस्पृशानमो वाचे
इति शांतिं पठंति ॥ प्रस्तोता आश्वलायनो ब्रह्मा होता च पठेत् सर्वेषां विहितत्वात् ॥
प्रतिप्रस्थाता अग्रेण गार्हपत्यं तृणानि संस्तीर्य सादयति ॥ संभृतं महावी
रादि संम्राडासंदी स्रुक्पूर्णा शफौ कुश्याफो उपयमनं रुक्मो वेदो धृष्टी त्री ॥ विधावित्राणि
षट्त्रिंशकलामेतान्यौदुंबराणि समिधं त्रयोदश परिधीन्प्रचरणीए तानि वै
कंकतानि कार्ष्मर्यमयान्परिधीन् तेसां वर्णरजतौ रुक्मौ शतमानौ धेनुं च छागं
च बर्हिःस्थापयित्वा द्वौ वेदौ एकं मौंजं चेदमपरिवासितं मौंजैर ज्जुदामनी मुं
जप्रलवान्दूरे हिरण्य पिष्टाभिस्चरत्न वा नेत्त मीति केशवस्वामिनः ॥ सिकता
इति ॥ गार्हपत्यस्योत्तरतः स्फ्येनोद्धत्यावोक्ष्य सिकतान्युप्यप्राग्वेणामा
त्रं परिमंडलं कृत्वा सिकताभिरुज्वेलं करोति स एष प्रवंजनी यत्वरः ॥

एकमाहवनीयस्योत्तरतः स्थूणासनीयः खरः उत्तरेपाशालखंडे तथैवचतु
८२ रस्रमुदक्जलनिर्गममार्गवंतमुच्छ्रितखरंकरोति॥ इतःप्रभृत्यथाध्वर्युरित्र
चरणोपाभीतिसूत्रादध्वर्युःकर्ता॥ अध्वर्युर्मुख्यंमहावीरंशफाभ्यांपरिगृह्य
प्रउंजनायेखरेसादयित्वा मौंजेनवेदेनापिधायसम्राडासंदीमयेणाहवनी
यंनीत्वाराजासंद्यादक्षिणतोभिधायतस्यांकृष्णाजिनंप्राचीनग्रीवमुत्त
रलोमोपस्तृणाति। तस्मिन्नुपरायोर्महावीरैर्वेदाभ्यांपरिगृह्यपूर्ववदा
हृत्यप्राचीनबिलौसादयति। ततःअग्निंततःशिष्टंमदंस्थूणांशंकुचा
द्यायजघनेनगार्हपत्यंपरीत्यदक्षिणया। द्वारोपनिष्क्रम्यहोतुःसंदर्शस्थू
णांनिहत्यमौंजेनदाम्नाघर्मदुघोवत्संबध्वानदुत्तरतः॥ रोकोछागांबं
ध्वाछागा। शिष्टुंप्रच्छाद्यशालांततःप्रवर्ग्यंनिष्क्रास्यपत्नींप्रच्छाद्यहोतारं ८२

यत्वामरवायत्वा सूर्यस्य हरसेत्वा ॥ समीपं गच्छन्यराद्वसंभारान्महावीरंप्रोक्ष
पात्रैवयथासर्वेषां प्रोक्षणाभिध्यातिर्भवति तत्तथाप्रोक्षति ॥ तत्रतत्रगत्वा तू
ष्णीं प्रोक्षतीतिदेवस्वामिः ॥ प्रतिप्रस्थाता आहवनीयेकार्ष्मर्यमयान्परिधी
न्परिदधाति ॥ तत्समीपेषट्शकलान्समिधश्चसादयति ॥ गार्हपत्यसमीपे
त्रयोदशपरिधीन्मुक्तोमुंजप्रलवान्रौहिणपिष्टाभिवसादयति ॥ प्रोक्षिता
न्संभारान्प्रतिप्रस्थाता न्यत्रस्थापयति ॥ अध्वर्युः परिधिपरिधानादक
रोतीतिदेवस्वामिः ॥ अग्नीध्रोगार्हपत्यस्य पश्चादुपविश्यधृष्टीभ्यांप्र
तीच्योंगारान्निरूह्य तेषुरौहिणकपालेउपदधाति तच्छादक्षिणतएकमुत्तर
तएकंमृदंताभिः पिष्टाभिसंयुत्य अत्यंतं संयुतानीतिदेवस्वामिः ॥ पिंडो
कृत्वा पुरोडाशौश्रपयति ॥ आज्यस्थाल्यामाज्यंतिरः पवित्रमानीयाधोअ
योभयं पर्यग्निकृत्वा पुरोडाशौश्रपयति ॥ प्रतिप्रस्थातामौंजेनवेदेन ४४

महावीरंस्रुवंपिन्वनेरौहिणहवन्यौउपयमनंचसंमृज्याज्यमुत्पूयरौहिण
हवन्यौउपस्तीर्यपुरोडाशमुद्वास्यनिधायाभिघार्यकपालानिविमुच्यैक
कस्यांकुशमयाभ्यांचवेदाभ्यांपरिगृह्णातिवेद्यांसादयति ॥ दक्षिणंपरिधि
संधिमनुदक्षिणां ॥ उत्तरपरिधिसंधिमन्वुत्तरं ॥ पूर्वौरौहिणकेप्रागग्रेस्रुचौ ॥
प्रत्यंचावपरौरौहिणके ॥ अध्वर्युः प्रचरणीयंमहावीरंशफाभ्यांसव्येनगृहीत्वा
ज्यस्थाल्याः सकृदुपहत्यगार्हपत्येऽनवामैनौवाछिन्नयाधारयासंततंजु
तीऽजुहोति ॥ प्राणायस्वाहा ॥ व्यानायस्वाहा ॥ अपानायस्वाहा ॥ चक्षुषेस्वाहा
श्रोत्रायस्वाहा ॥ मनसेस्वाहा ॥ वाचेसरस्वत्यैस्वाहा ॥ यथालिंगंत्यागः ॥
चतस्रोयथोपपादंदक्षायस्वाहा ॥ क्रतवेस्वाहा ॥ ओजसेस्वाहा ॥ बला
यस्वाहा ॥ यथालिंगंत्यागः ॥ महावीरमाज्येनानक्ति ॥ दिवस्त्वासावितामध्वानक्तु ॥

